वि.स.-२०७२
वर्ष-४
अङ्क-१

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा ॥

# श्री निःश्रेयसम्

## षाणमासिक-पत्रम्

७



सम्पादकः
मुनिश्रीसम्यग्दर्शनविजयगणिवरः

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा ॥

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

# श्री निःश्रेयसम्

## षाणमासिकपत्रम्

७

सम्पादकः
मुनिश्रीसम्यग्दर्शनविजयगणिवरः

वि.स.-२०७२
वर्ष-४
अङ्क-१

।। णमोत्थुणं समणस्स भगवओ महावीरस्स ।।
।। ॐ ह्रीँ श्री शंखेश्वरपार्श्वनाथाय नमः ।।
।। पू.आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ।।
।।पू.मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरीभ्यो नमः।।

**श्रीनिःश्रेयसम् (षाण्मासिक-पत्रम्-७)**
वर्ष : ४ अङ्क = १

**निमित्तम् :**
जैनशासनज्योतिर्धर पू.आ.श्रीविजय**रामचन्द्र**सूरीश्वराणां दीक्षाशताब्दीचर्ष-वि.सं.२०६९

**आशीर्वाद :**
सुविशालगच्छनायक पू.आ.श्री विजय**पुण्यपाल**सूरीश्वराः
प्रवचनप्रभावक पू.आ.श्री विजय**मुक्तिप्रभ**सूरीश्वराः
वात्सल्यवारिधि पू.पं.श्री **वज्रसेन**विजयगणिवराः

**प्रेरणा :**
प्रसिद्धप्रवचनकार पू.आ.श्री विजय**श्रेयांसप्रभ**सूरीश्वराः
प्रवचनकुशल पू.आ.श्री विजय**हेमप्रभ**सूरीश्वराः

**सम्पादनम् :**
पूज्यमुनिप्रवरश्री**सम्यग्दर्शन**विजयगणिवरः

**संशोधनम् :**
पूज्य साध्वीजीश्री **प्रशमनिधि**श्रीः
पं.श्री **अमृत**भाई पटेलः

**प्रकाशनप्रतिष्ठानम् :**
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भठ्ठा, पालडी, अहमदाबाद फोन : (ओ) २६६० ५८६४

**प्रकाशनम् :**
वैक्रमीय २०७२, पोष शुक्ल-१३,
शुक्रवार, दि. २२-१-२०१६

**प्रतयः** ७५० **मूल्यम् :** २००

---

आभारः....अनुग्रहः....अनुमोदनम्....

प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजयश्रेयांसप्रभसूरीश्वराणामुपकारस्मृत्यर्थम्
गुरुभक्तपरिवारेण अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतस्तमनुमोदयति...
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनस्य**
**सञ्चालकगणः**

# संस्कृतेनैव जीवनं सफलम् ।

ऐन्द्रादिसकलसत्त्वसङ्घातमहितं भगवद्वचनं नि:शङ्कं सर्वोत्कृष्टम् नि:श्रेयस- पदप्रापकं भवति। तेनैव पूर्वस्मिन्नङ्के **''संस्कृतिर्धर्ममूलं, संस्कृतिमूलं तु संस्कृतम्''** इत्युक्त्वा संस्कृतमेव मोक्षकारणं भवतीत्युक्तमासीत्। यत: संस्कृतभाषासंपर्कादाप्तपुरुषै: सह संपर्को वर्धते, तेनैव च जीवनं सुसंस्कारोपेतं भवति। सुसंस्कारेणचाल्पहिंसायुता साम्रगी समागच्छति। संस्कृतिमूलम् तु धर्म एव। धर्मस्तु मोक्षकारणं तत: संस्कृतभाषापरिचयात् नि:श्रेयसमपि प्राप्नोति जीवइत्यत्र न कोऽपि विरोध:।

पूर्वर्षिरचितसंस्कृतभाषानिबद्धग्रन्थानां पुनः पुनः पठनपाठनचिन्तनमनन-निदीध्यासनै: स्वस्थतां जीवो लभते। आत्मचक्षु: प्राप्नोति। बहिर्वृत्तेर्बहिर्निर्गच्छति। समता तस्य हस्तगता भवति। ममता प्रतनुर्भवति। पौद्गलभावस्तं नाऽकर्षति। अनुकूलप्रतिकूलसंयोगे स्वस्थमना जीवो भवति। मानाऽपमानसमवृत्तिर्भवत्यस्मदात्मा। सांसारिकसुखेच्छा स्थगयति। आत्मजन्यसुखेच्छा प्रवर्धते। धनवैभवेष्वैव सुखमिति बुद्धि र्न प्रभवति।

संस्कृतभाषायामेव स्वात्मस्वभावप्रकटनबलमस्ति। प्राचीनधर्मशास्त्रग्रन्था: संस्कृत-प्राकृतगिरायामेव वर्तन्ते तेन! अध्यात्मभावो प्रवर्धते। ततो न कदापि स उन्मार्गगमनं करोति। हिंसामृषाचौर्याऽब्रह्मपरिग्रहादिप्रबलतरपापारम्भेन स्वात्मानं दुर्गतिपथातिथिं न वितनुते स:।

तत उक्तं यद् ''संस्कृतेनैव जीवनं सफलम्'' यतो मानवजन्म संप्राप्य स्वस्वभाव-प्राप्त्यन्तरेण न किमपि प्राप्तव्यम्।

सैव च सहानुगा, न तु धनाढ्यतादि: सहगो भवति। स्वस्वभावप्राप्त्यैव जीवनं सफलं प्रशस्यं भवति। तत: संस्कृतेनैव जीवनं सफलं कर्तव्यमित्याशासास्यते।

– परमश्रद्धेयगुरुदेवश्रीमद्विजयश्रेयांसप्रभसूरीश्वर-
चरणसेवाहेवाकीमुनिसम्यग्दर्शनविजयगणिवर:

# क्रमनिर्देशः


| विषयः | लेखकादयः | पृष्ठम् |
|---|---|---|
| प्रतिघोषः | | १ |
| **खण्ड-१ : प्राचीनकृतयः** | | |
| पूर्वर्षिरचिता स्तुतित्रिकम् | मुनिश्री धर्मतिलकविजय गणिः | २ |
| सम्यक्त्वदीपिका स्नात्रपञ्चाशिका | साध्वीजीश्री चिन्तनप्रियाश्री | ५ |
| **खण्ड-२ : यशोप्रज्ञादर्शनम्** | | |
| परमज्योतिः पञ्चविंशतिका | आचार्यश्री कल्याणबोधिसूरयः | १९ |
| वृत्तं यशोविजयवाचकपुङ्गवानाम् | मुनिश्री सम्यग्दर्शनविजयगणिः | २० |
| तत्त्वान्तम् | मुनिश्री किर्तीन्द्रविजयः | २२ |
| यशोगूर्जरस्तवनानुवादः | मुनिश्री आत्मदर्शनविजयः | २४ |
| शामलापार्श्वनाथप्रभुस्तवनम् | साध्वीजीश्री विरागदर्शनाश्रीः | २७ |
| **खण्ड-३ : दीक्षाशताब्दीभावाञ्जलिः** | | |
| समाधिः शरणं मम | पंन्यासश्री मोक्षरतिविजयगणिः | ३० |
| श्रीरामचन्द्रीयमहाकाव्यम् | पंन्यासश्री मोक्षरतिविजयगणिः | ३२ |
| सूरिरामवचनामृतम् | मुनिश्री प्रशमरतिविजयः | ४१ |
| **खण्ड-४ : अर्वाचीनकृतयः** | | |
| गुणाधिराजः | आचार्यश्री कल्याणबोधिसूरिः | ४७ |
| आगमस्यामृतम् | आचार्यश्री कल्याणबोधिसूरिः | ४९ |
| चारित्रसप्तविंशिका-६ | मुनिश्री सम्यग्दर्शनविजयगणिः | ५१ |
| काव्यशास्त्रविनोदेन | मुनिश्री सम्यग्दर्शनविजयगणिः | ५६ |
| सम्पत्तौ च विपत्तौ च महतामेकरूपता | मुनिश्रीश्रुततिलकविजयः | ५७ |
| किं नाम जैनीदीक्षा? | मुनिश्री पुण्यश्रमणविजयः | ६२ |
| श्री स्थूलभद्रं मुनिपं स्मरामि | मुनिश्री दर्शनरक्षितविजयः | ६५ |
| शिष्याष्टकम् | मुनिश्री प्रशमरक्षितविजयः | ६६ |
| बहुरत्ना वसुन्धरा | मुनिश्री दर्शनरक्षितविजयः | ६७ |
| सफलं जीवन् | मुनिश्री प्रशमरक्षितविजयः | ६९ |
| तत्त्वसर्वस्वम् | प्रियम् | ७२ |
| तपोमहिमागानम् | साध्वीजीश्री प्रशमनिधिश्री | ७६ |
| श्रेयस्करीजिनस्तुतिचतुर्विंशी | साध्वीजीश्री प्रशमनिधिश्रीः | ७७ |
| आदर्शं पत्रलेखनम् | पं. अमृतपटेलः | ८३ |
| गणतन्त्र-दिवसम् | डॉ. आचार्यरामकिशोरमिश्रः | ८७ |
| वैश्विकः सखा | प्रो.चन्दुलाल व. ठकरालः | ८९ |
| जैनप्रमाणमीमांसाया मूलाधारः प्रामाण्यविमर्शश्च | आ. गोकुलचन्द्रजैनः | ९२ |

# प्रतिघोषः

डॉ. भगवतीलालराजपुरोहितः
बिलोटीपुरा, उज्जैन-४५६००६.

महोदयाः

लब्धं निःश्रेयसम् नव्यं,
दिव्यं भव्यं सुसंस्कृतम्।
ज्ञान-विज्ञानसम्पन्नं,
काव्यलीलासुलक्षणम् ।।

* * *

चंदुलाल व. ठकरालः

संपादकश्री

''निःश्रेयसम्'' संस्कृतषाण्मासिकपत्रिकायाः षष्ठाङ्कदर्शनेन मम हृदये सञ्जाता महती खलु प्रसन्नता। अत्र विषयाणां विविधता खलु आकर्षणमुत्पादयति। पाठकानां विविधाः कक्षाः स्वानुरूपं पाथेयं ग्रहीतुं क्षमाः भवन्ति।

विकसतु तावत् एषा पत्रिका चिरकालं यावत्। संपादकमण्डलस्य सर्वे सदस्या अभिनन्दनानाम् बाहुल्यं अर्हंति।

शुभम् अस्तु

* * *

प.पू.सम्यग्दर्शनविजयगणिवरः!

सश्रद्धम् प्रणामम्। भवद्भिः प्रेषितम् 'निःश्रेयसम्' (षष्ठम्अङ्कम्) अधिगतम्। अस्याः दर्शनम् च मुद्रणशुद्धिम् च नयनरम्यम् अतः अभिनन्दनम्।

विशेषः तु रुपनारायण पाण्डेयपत्रम्-लेखम् च पठित्वा तुष्टोस्मि।

प्रो.ज. मधुसूदनः म. व्यासः
९७, जलदर्शन सो. मालपुरमार्गः, मोडासा-३४३३१५, जि.अरवल्ली

* * *

विजयमुक्ति-मुनिचन्द्रसूरी

विद्वन् मुने श्रीसम्यग्दर्शनविजय!

सादरमनुवन्दनाऽस्तु निःश्रेयसम्-३ अधिगतम्। केचन लेखाः पठिताः। उत्तरार्धं किञ्चित् अधिकं रुचितम्। प्रतिघोषोऽयं प्रेषितः। ''क्रोधो वैश्वानरोपमः'' इति लेखे क्रोधवर्णनं सम्यग् विहितम्। क्रोधनिग्रहस्य किं फलमित्यत्र अस्मद्गुरुदेवाः पू.श्री कलापूर्णसूरयः स्मृतिपथमवतरन्ति। पूज्यपादानामनेकप्रसङ्गेभ्यः क्रोधनिग्रहफलं अस्माभिः ज्ञातम्। ततः क्रोधं कुर्यात् स पशुः। क्रोधं रुन्ध्यात् स मानवः।

# खण्ड-१
# प्राचीन-कृतयः

## पूर्वर्षिंरचितास्तुतित्रिकम्

-*सं.मुनिश्री धर्मतिलकविजय गणिः

**श्री चतुर्विंशतिजिनस्तुतिः**

श्री केवलज्ञानविभैकधाम
ऋते भवन्तं हृदयं दुरीहा।
षट्शत्रुजातादतिदुःखरावी
भक्त्याऽऽगतोऽस्मीत्यथ रक्ष वीर! ।।१।।

श्रीवीतरागाद्भुतमोहतापा
असंशयं जग्मुरकर्म पार्श्व ।
जिन! त्वदास्यांशुसुधानिपानात्-
तथा तव स्नात्रजलेन नाथ! ।।२।।

श्रीमज्जिन! त्वां हृदि दुःखदूने
संस्थाप्य यद्देव! सुखीभवामि।
भक्तिर्ममेयं न तु काऽपि नाना
वर्णा कृपा ते जयतीह नाथ! ।।३।।

अरुपिणी नष्टगुणा शिवश्रीर्-
भिन्ना कदाप्यस्तरसा रसेन।
नंदत्प्रभावा भवतोच्चकामि
दमाश्रितास्तां जिन ! के न नेमुः ?।।४।।

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

१. प्रथमाऽन्त्याक्षरसंयोजनेन स्तोतव्यजिननामगर्भितेयं स्तुतिः।

नको मनोभूस्त्रिजगतन्त्यमूनि
सुखाद् बबन्ध त्वरितं मनस्सु।
मत्वेति हत्वा मन एव तीव्र
तिरोभवस्त्वं शुचिधर्मधातः! ।।५।।

पश्याऽऽहिता दुर्निगडे प्रमादे
न्नको वयं दुःखकदन्नमेव
प्रभो!ऽसि सौख्यामृतमात्तधाम
भवे त्वदन्ता किमिदं न भल्लि ।।६।।

श्रीवीतरागेन्द्र! शिवश्रिया अ
सुखा-ऽऽसुखाद्यल्पविकल्पभार!
पार्श्वे न तस्याऽक्षरणोऽहिना ना
श्वृन्दमातिष्ठति नैव नाथ ।।७।।

चंद्रो यथा नन्दति सर्वरौ कुं
द्रवेत् तु चन्द्राश्मचयोऽमृतं थु।
प्रभो! तथा शान्तरसान्विता जना
भवन्ति ते वाग्भिरनूनवित्पथ ।।८।।

श्रीरज्जुबद्धां नृततिं दृढाशा
सुमोह एष भ्रमयन्नरातिर् ।
विभो! तवाग्रे तु नयेन् कदानाऽऽ-
धि-व्याधिवह्नि प्रशमेऽसि पाथः ।।९।।

श्रीमन्नहं मोहतमोभिरन्धः
शीलाध्वहीनं कृतवान् कुकर्म ।
तस्य क्षयोऽभूत् तव दर्शने नाऽ
लसं मनो मेऽस्तु तवाङ्किते॓ऽथ ।।१०।।

श्रीमन्! यथाऽऽद्यो लघुरष्टजुः श्री
श्रेष्ठः प्रवृद्ध्यै वचनश्रिया अ ।
यास्त्वं नृचित्तेऽणुरपीह नूनं,
सर्वोरूरेवाऽसि तथाऽद्य नेतः! ।।११।।

**वा**ग्मीश! ते सर्वसमा वच: **श्री**
**सु**धास्रवा सद्भिरिति व्यभा**वि**।
**पूर्णा**त् सुमात्त्वाम्बुधितो निका**म**
**ज्या**योरसोल्लोलतति: समू**ल** ।।१२।।

इत्थं श्रीजिनराजमव्ययसुखाऽऽयुर्वीयतेजोयुतं ।
स्वस्थै: श्री ऋषभादिनाममणिभि:, श्रेणिद्वयस्थै: क्रमात् ।
नित्यं भूषितमात्मचेतसि मुदा संस्थाप्य यो ध्यायति
सिद्धिश्री**कमलप्रभः** स भवति स्फुर्जद्यश:सौरभ:।।

## श्री वर्धमानस्वामिनः स्तुतिः

देवाधिदेव! परमेश्वर! वीतराग!
सर्वज्ञ! तीर्थंकर सिद्ध! महानुभाव!
त्रैलोक्यनाथ! जिनपुङ्गव! वर्धमान!
स्वामिन्! गतोऽस्मि शरणं चरणं द्वयं ते।।

## श्री शत्रुञ्जयैकविंशतिनाम गर्भिता स्तुतिः

विमलगिरि मुत्तिनिलओ, संत्तुजो सिद्धखित्त पुंडरिओ।
सिरिसिद्ध सेहरओ, सिद्धपव्वओ सिद्धराओ अ ।।१।।

बाहुबली मरुदेवो, भगीरहो सहस्सपन्नसयवन्तो।
कूडसयड्डुत्तरओ, नगाहिराओ सहस्सकमलो ।।२।।

ढंको कउडिनिवासो, लोहिच्चो तालज्झओ कयंबुत्ति।
सुरनरमुणिकयनामो, सो विमलगिरि जयउ तित्थं ।।३।।

# सम्यक्त्वदीपिका स्नात्रपञ्चाशिका

- *साध्वीजीश्री चिन्तनप्रियाश्री

(इयं कृति: सम्यक्त्वदीपिकास्नात्रपञ्चाशिकानामकथावल्लीसमन्वितासम्यक्त्वभाववर्धिनी समस्ति। यद्यपि स्नात्रपञ्चाशिका: प्रभूततरा: सन्ति तत्रेयं सम्यक्त्वदीपिका भवानन्तदुर्लभसम्यक्त्व-प्रदात्री। श्रमण-भगवन्महावीरशासने सूरिश्रेष्ठश्रीउदयोदधिप्रवरै: वैक्रमीय १८५४ तमे समे संरचिता। वैक्रमीय१९५७ तमे समे कल्लारामनाथलिखिता लब्धा च बडौदानगरस्थितजैनज्ञानमंदिरे ६३ तमेऽङ्के संस्थिता। कथाग्रंथोऽयं सत्यतत्त्वप्रदायको भविष्यतीति शम् एतद्-बृहत्तरग्रन्थ:, तेन चतुर्धा विभक्त: चतुर्थ: प्रस्तूयते। संपादिका)

**प्राचीमेकां पुनानामिह सुरसरितं वीक्ष्य कारुण्यधाम्ना,**
**धृत्वा मूर्तीश्चतस्त्रः परमहिमवता येन गंगाचतुष्कम्।**
**आविश्चक्रे चतुर्दिक्समुदितजनतातापहृत् शुद्धवर्णं,**
**व्याख्यावाणी विभाद्रौ, स दिशतु कुशलं श्रीयुगादीशदेवः।।१।।**
**सुश्रावकै र्जिनस्यार्चां, कार्यमाणां मनोहराम्।**
**वीक्ष्य भावनया सौख्य-भाग् भवेत् कृष्णविप्रवत्।।२।।**

**अस्यार्थः -** समीचीनश्रावकै: श्रीजिनसेवां कुर्वाणां निरीक्ष्य, बहवो मनुष्या: सौख्यभाजो भवेयु:, कृष्णविप्रवत्। श्रीमकरापुर्यां श्रीवीरनामा भूपालो राजते, अन्यदा नगरोद्याने श्रीजिनेश्वर: समवसृत:, तद्वन्दनार्थं भूप: सपरीकरो गत:, देशनां निशम्य, राजा प्रपच्छ 'अहो भगवन्! मया पूर्वभवे किं सुकृतं कृतं? येनेदृशीं ऋद्धिं प्राप्तोस्मि। तदा भगवद्भि: प्रोक्तं-हे राजन्! प्राग्भवे काशीपुरे कृष्णनामा द्विजस्त्वमभव:, निर्धनो महता कष्टेन जीविकामकरो:, कस्मिंश्चित् समये इभ्यव्यवहारिण: श्रीजिनेश्वरस्य पूजां कुर्वन्ति। तदा विप्रेण चिन्तितं-यदि मद्गृहे लक्ष्मीरभविष्यत्, तदाहमपि भगवदर्चां बहुभावभक्त्या

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्तिनी।

चाकरिष्यम्, परं किं कुर्याम्? अहं दरिद्री निर्भाग्यशेखरो, मत्पार्श्वे किमपि द्रव्यं नास्ति, एवं प्रतिदिनं जिनालये आगत्य, भगवदग्रे कृष्णविप्रो भावनां भावयति, अमुना प्रकोरण भावनां भावयन् स विप्रः कालं कृत्वा, त्वं वीरनामा भूपो जातः, पुनरिह भवात् च्युत्वा देवलोके देवता भविष्यसि, ततश्च्युत्वा महाविदेहे सेत्स्यसि।

इति श्री स्नात्रपञ्चाशिकायां पूजाधिकारे वीरभूपकथा त्रयस्त्रिंशत्तमी ...३३

---

**धारिंतो पकटं अनुक्कडजटाजूटच्छटाऽडम्बरं,**
**तं निंतो मतनं कतंतसतनं तिंतो भवानीहितं ।**
**सच्चक्षू(क्खू)गणनाधवंतितपतो तेवाहितेवो सता,**
**भव्वाणं वसहद्धजो जिनपती तिज्ञा पतं सासतं।।१।।**
**सिंहल-क्षितिभुक्पुत्री, कुवार्णा जिनचर्चनं।**
**मुक्तियानोचितं कर्मोपार्जयामास तद्यथा ।।२।।**

**अस्यार्थः** - यथा जिनराजपूजातः सिंहलराज्ञः पुत्री मुक्तिगमनयोग्यं कर्म (स) मुपार्जयामास, तथा भव्यजीवेनापि जिनपूजा कार्या, अत्र तत्कथा प्रतिपाद्यते-

भृगुकच्छपुरे बहवो बौद्धदर्शनिनो गृहस्थाः परिवसन्ति स्म, तथा बहूनि बौद्धचैत्यालयानि सन्ति। तत्रान्यदा एकबौद्धचैत्योपरि शकुनिका उपविष्टाभूत्, तदा केनचिन्मिथ्यात्विपुरूषेण बाणेन विद्धा, मूर्च्छां प्राप्य, भूमौ पतिता, तस्यामेव वेलायां तस्या शकुनिकायाः जैनमुनीश्वरेण नवकारमन्त्रः कर्णे श्रावितः, तया श्रुतः, मनसि धारितः, पश्चात् सिंहलद्वीपस्य सिंहलनाम्ना भूपस्य राज्ञ्युदरे पुत्रीत्वेन उत्पन्ना, समये जन्म जातम्। सौभाग्यसुन्दरीति नाम दत्तम्, चतुःषष्टिमहिलागुणैर्युक्ता जाता, अथैकदा प्रस्तावे तया कुमार्या श्रावक मुखान्नवकारः श्रुतः, तदा उहापोहं कुर्वन्त्या - राजपुत्र्याः जातिस्मरणं उत्पन्नम्, पूर्वभवस्वरूपं सकलं स्मृतम्, स्वकीयस्वजनाग्रे सर्वं-निजवृत्तं कथितम्, अथ सा कुमरी सप्तशतप्रवहणानि क्रयाणकैर्भृत्वा, भृगुकच्छपुरे समागता। सर्वाणि क्रियाणकवस्तुनि तत्र विक्रीय, तल्लाभद्रव्यैः कृत्वा श्रीमुनिसुव्रतस्वामिनश्चैत्यं समलीविहाराभिधं कारापितम्, अथ च सा नृपकन्या सौभाग्यसुन्दरी तत्र भृगुकच्छपुरे सुन्दरावासे संस्थिता, श्रीजगत्परमेश्वरस्य द्रव्यपूजां भावपूजां च सुविधिना चक्रे अत्यन्त पुण्यमुपार्ज्य, प्रान्ते मृत्वा द्वितीयदेवलोके ईशानेन्द्रस्य, मुख्यदेवाङ्गना जाता, तत्र देवसुखं भुक्त्वा ततश्च्युत्वा मनुष्यभवं प्राप्य पर्यन्ते दीक्षां गृहीत्वा मोक्षं यास्यति.

इति श्री सिंहलनृपपुत्रीकथा चतुस्त्रिंशत्तमी ... ३४

---

**आनंदकंदं पढमं मुणिंदं, सव्वन्नुभावेण समत्थभावा।**

**धम्माइया जाणिय सव्वदव्वा, सत्तुंजसेलट्ठिय तं थुणामि।।१।।**

**वितन्वानो जिनेंद्रार्चां, भावेन भविकोऽङ्गवान्।**

**राज्यादिश्रियमाप्नोति, कुम्भकारप्रियेव हि ।।२।।**

अथ कथा निगद्यते -

चन्द्रपुरीनगर्यां बहिरुद्याने श्रीऋषभदेवस्य चैत्यमस्ति, तत्रैको गर्दभः समागत्य, चैत्यद्वारे रोदिति, तृणभक्षणं न करोति, पानीयं न पिबति, तत्रैवोपविशति तिष्ठति च अहर्निशं रोदनं कुरुते। ईदृशं स्वरूपं चंद्रपुरीस्वमिना मेघभूपेन वनेचरमुखात् श्रुतम्। तद्विलोकनार्थं अन्तःपुरेण सार्धं भूपस्तत्र वने गतः, अन्येपि बहवो लोकाः कौतुकप्रेक्षणार्थं तत्रायाताः। चैत्यपार्श्वे एको रासभो दीर्घस्वरेण रुदन् निरीक्षितः, तत्र रासभस्य स्वरं, श्रुत्वा, राजपुत्रः मूर्च्छां प्राप्तः, भूमौ पतितः, राजादयः सर्वे लोका हाहारवं कुर्वन्ति स्म। तदवसरे वनमध्ये मुनीश्वरं दृष्ट्वा नृपो वन्दनां कृत्वा, एवं पृच्छति स्म-अहो स्वामिन्! कथय, एष रासभः कथं रोदिति पुन र्ममपुत्रः कथं मूर्च्छां प्राप्तः, तदा गुरुणा ज्ञानं प्रयुज्य प्रोक्तं-अहो नरेन्द्र! अस्यां नगर्यां, एको धननामा कुम्भकारः पूर्वमभूत्, तत्पत्नी रमाभिधाना, सा निःकपटा नित्यं धर्मक्रियातत्परा। अथान्यदा समये चन्द्रपुरीस्वामिना चन्द्रभूपेनेदं चैत्यं कर्त्तुमारब्धं, तदा रमाकुम्भकारिकया निजपतिं प्रत्युक्तं -अहो स्वामिन्! आत्मीयगृहे धनं प्रभूतं अस्ति, ततो नृपचैत्यपार्श्वे एकं लघुचैत्यं कारयित्वा, नरजन्म सफलं कुरुत। तर्हि धनकुम्भकारेण गदितं, मम चैत्येन सह न किमपि कार्यं, निरर्थकं द्रव्यव्ययं न कुर्यां, ईदृशमयोग्यपात्रं कृपणं भर्तारं ज्ञात्वा रमाकुम्भकारिकया स्वीयद्रव्येण लघ्वर्ह्च्चैत्यं नृपचैत्यपार्श्वे कारापितम्, पश्चाद् धनकुम्भकारो, धनं धनमेवं कुर्वन्, आर्त्तध्यानवशेन मृत्वा, एषो गर्दभो जातः । निजस्त्रीकारितं लघुचैत्यं निरीक्ष्य, किञ्चित् ज्ञानं उत्पन्नम्, तेन पूर्वभवचरितं ज्ञात्वाऽत्रैव रोदिति। चारं न चरति, जलं न पिबति पुनः पश्चात्तापं करोति, पुनस्तत्पत्नी धर्मं विधाय, शुभध्यानेन कालं कृत्वा देवकुमारनाम्ना तव पुत्रो जातः, एवं ज्ञानिगुरुवाक्यं श्रुत्वा रासभो रोदनं कुर्यात्। नृपपुत्रः सचेतनोऽभूत् रासभस्तत्र प्रतिबुद्धो नित्यं जिनदर्शनं चक्रे, भावनां भावयन्, पूर्वस्वकृतं कर्म निन्दन् निजस्त्रीकृतशुभचैत्यं तदनुमोदयन्, चन्द्रराज-देवकुमारादयो बहवो लोकाः, परमात्मभक्तौ सुविशेषेणोद्यता अभवन्, एवं बहुपुन्यमुपार्ज्य त्रयोपि जीवाः, कालं कृत्वा, सद्गतिं प्राप्याऽनुक्रमेण मोक्षं प्राप्स्यन्ति।

इति श्री स्नात्रपञ्चाशिकायां रमाकुभकारिकाकथां पञ्चत्रिशत्तमी ... ३५

**अगम्यमध्यात्मविदामवाच्यं, वचस्विनामक्षवतां परोक्षम् ।**
**श्रीआदिदेवाभिधमात्मरूप-महं स्तुतेर्गोचरमानयामि ।।१।।**
**आगते वार्षिके पर्व-दिने यो जिनपूजनम् ।**
**करोति लभते शं स, युधिष्ठिरनरेन्द्रवत् ।।२।। अस्यार्थः-**

पर्युषणापर्वसमागते यो मनुष्यः श्रीजिनेश्वरस्य पूजनं करोति, स नरः सुखं लभते। युधिष्ठरनरेन्द्रवत्, तत्चरित्रं संक्षेपतः कथ्यते।

अथान्यदा धर्मपुत्रः युधिष्ठिरराजा निजबान्धवयुतः, द्रुपदीयुक्तः वनवासे समवतिष्ठते, तदवसरे पर्युषणापर्व समागतम्, तदा युधिष्ठिरभूपः भ्रातॄन् समाहूयैवं प्रोक्तवान् - अहो भ्रातरः! अद्यवार्षिकपर्वास्ति, तत एकान्तस्थले वने स्थित्वा निजशक्त्या श्रीजिनेश्वरस्य स्नात्रपूजां कृत्वा, भाद्रशुक्लपञ्चमीं समाराधयेयुः। तदा सर्वेपि बान्धवा एकत्रीभूय, वृन्दावने गत्वा, पञ्च भ्रातरो माता तथा स्थितिः (?) सार्धं श्री जिनेश्वरस्य पूजां चक्रिरे, अष्टमतपः कृत्वा, भाद्रपदशुक्लपञ्चम्यां सन्ध्यासमये समस्तपरिवारयुक्ताः पाण्डवाः प्रतिक्रमणं चक्रुः, सर्वजीवायोनीनां क्षमणानि दत्त्वा पुण्यमुपार्जयामासुः।

इति श्री स्नात्रपञ्चाशिकायां श्री पर्वदिने पूजायां युधिष्ठिरनृपकथा षट्त्रिंशत्तमी ३६

---

**वाणिज्जं ववहार - पाणिगहणं सामागराइट्ठिई**
**धम्माधम्मविचारुसारु कहिओ जेणऽज्जऽवि साहु वि।**
**अम्हे आणविहंतडातसु तणी सीसुल्लडे अप्पणे ?**
**पाए आदिजिनेसरस्सु नमहं आणंदि नच्चंतया ।।१।।**
**वार्षिकाऽऽह्वे क्षणे तीर्थंकरपूजां करोति यः।**
**लभते स श्रियं कालक्रमात् संप्रतिभूपवत् ।।२।। अस्यार्थः-**

यो भव्यजीवो वार्षिकपर्वणि समागते श्री तीर्थंकरस्य पूजां करोति, स मनुजः अनुक्रमेण मोक्षसौख्यं लभते, संप्रतिभूपवत्, अत्र तत्कथा लिख्यते-

श्रीसंप्रतिभूपः श्री आर्यसुहस्तिसूरिं प्रणम्य, करकमलं संयोज्य, एवमपृच्छत् - कथय प्रभो, सर्वेषु पर्वसु सर्वोत्तमं किं पर्व? तदा गुरुभिः प्रोक्तं हे राजन्! श्रुणु-तीर्थकृद्भिः पर्युषणापर्व सर्वोत्तमं कथितम्, यत्पर्वणि समागते, चतुःषष्टिः सुरेन्द्राणां समस्तदेवा अपि एकत्र मीलित्वा नन्दीश्वरद्वीपे गत्वा, अष्टाह्निकामहोत्सवं चक्रुः। अस्मिन् पर्वणि समायाते (श्राद्धाः) सर्वत्र अमारिघोषणां विदधुः, पुनः स्नात्राणि, सप्तदशभेदभिन्नां जिनार्चां ध्वजरोपणं च दानादीनि च धर्मकार्याणि वितेनिरे। मुक्तिदायकं पुण्यमुपार्जयामासुः। एवं पर्वमहिमां श्रुत्वा संप्रतिभूपः आत्मीयदेशे पर्युषणापर्व(णि) समायाते, अष्टदिनपर्यतं,

अमारिघोषणां कारयामास। पुनस् तीर्थंकरभक्तिः प्रतिस्थानकं कारिता, आत्मीयबहुभावभक्त्या अष्टदिनं यावद् विशेषेण जिनभक्तिं चकार यावज्जीवमीदृशं धर्मक्रियां विधाय, मुक्तिसुखस्य – कारणमर्जयामास।

इति श्री स्नात्रपञ्चाशिकायां श्रीपर्वपूजायां संप्रतिभूपस्य कथा सप्तत्रिंशत्तमी . ३७

---

**वृषभलाञ्छनसेवितपत्कजं, कनककान्तिविराजितसत्तनुम्।**

**विमलशैलशिरःस्थितमर्हतम्[१], ऋषभदेवजिनं प्रणमाम्यहं ।।१।।**

**वार्षिकपर्वणि प्राप्ते सहर्षे भव्यमानवैः**

**जिनपूजा विधातव्या, विक्रमार्कनरेन्द्रवत् ।।२।। अस्यार्थः-**

भव्यजीवै वार्षिकपर्वणि समागते सति, हृष्टः सन् (हृष्टैः सद्भिः), श्री जिनपूजा कर्त्तव्या, विक्रम नरेन्द्र वत्, अत्र तत्कथा कथ्यते।

एकदा प्रस्तावे सिद्धसेनाचार्येण विक्रमार्कभूपं प्रति प्रोक्तं – अहो राजेन्द्र! वार्षिकपर्व समागच्छन्तं (च्छन्द) ज्ञात्वा एवं कुरुते, आषाढं-शुदि-पूर्णिमातः आरभ्य श्रीभाद्रपदशुदिपञ्चमीपर्यंतं श्रीजिनेश्वरचैत्ये भव्यप्राणिनः स्नात्रपूजादि महोत्सवं कुरुते, तस्य बोधिबीजस्य प्राप्तिर्भवेत्, ततो मोक्षं प्राप्नुयात्, एवं जिनेश्वर-पूजाया माहात्म्यं श्रुत्वा, विक्रमार्कनरेन्द्रः प्रतिवर्षं वार्षिकपर्वोत्सवं चक्रे, अन्यत्पार्श्वे, कारयामास, आत्मीयदेशे अमार्युदघोषणां कारयता, नित्यं स्नात्रपूजादिना, ध्वजारोपणादिकेन च जिनभक्तिः क्रियते। एवं जिनभक्तिं कुर्वता सम्यक्त्वशुद्धिर्जाता-प्रान्ते सद्गतिं प्राप विक्रमार्कनरेन्द्रः।

इति स्नात्रपञ्चाशिकायां पूजाविषये विक्रमार्कनृपकथा अष्टत्रिंशत्तमी...३८

---

**स्वस्ति श्रीव्रततिप्रवृद्धिकरणं प्रोद्दामधाराधरं,**

**भव्यप्राणिहृदीप्सितार्थनिकरप्रत्यक्षदेवद्रुमम्।**

**योगीन्द्रामलमानसैकसरसीचक्राङ्गमीडे मुदा**

**वामेयं विमलं प्रभावभवनं गौडीपुराधीश्वरम् ।।१।।**

**अन्यैर्विस्तरतः पूजां क्रियमाणां जिनेशितुः।**

**निरीक्ष्योपार्जयामास नरः शं भावसारवत्।।२।।अस्यार्थः-**

अपरेण पुरुषेण तीर्थंकरस्य विस्तरतः पूजा कृता, तां दृष्ट्वा शं सुखकारणमुपार्जयेत् – भावसारवत्, अत्र तत्कथा निगद्यते।

श्री कान्तिनगरे गजनामा राजा रराज, स भूमिपालः वार्षिकपर्वणि समागते सति,

१. स्थितमर्हन्तम् इति सुष्ठु,तथाकृते तु छन्दोभङ्गः

महताडम्बरेण जिनपूजां कारयामास। तां दृष्ट्वा एको भावसारश्चित्तेऽचिन्तयत्, मम धिक्कारो, यदहं निर्धनीभूतोस्मि, द्रव्यं विना कथं जिनपूजां करोमि?। यदि मत्पार्श्वे धनमभविष्यत्, तदाहमपि जिनपूजामकरिष्यम्, परं किं करिष्ये, दरिद्री जातोस्मि, एवं चिन्तयन् भावसारो निजशक्त्या कुसुमानि गृहीत्वा, परमात्मपूजां चकार, तत्पूजा प्रभावेन पुण्यमुपार्ज्य, शिवं गतो, भावसारः।

इति श्री स्नात्रपञ्चाशिकायां श्री जिनपूजाप्रभावे भावसारकथा .. ३९

---

**यदीयमूर्ति र्भविनां समस्तं निहन्त्यघं दृष्टिपथावतीर्णा।**

**स देववृन्दार्चितपादपद्मः श्रीशान्तिदेवो वितनोतु पद्माम् ।।१।।**

**जनैः सांवत्सरे पर्वण्यागते सुखदायके।**

**प्रभावना विधातव्या भव्यैर्वज्रगणेशवत् ।।२।। अस्यार्थः**

भव्यैर्जनैः श्रीपर्वणि समागते सुखदायके श्रीजिनशासनस्य प्रभावना विधातव्या, वज्रस्वामिवत्, अत्र तत्कथा लिपीक्रियते सङ्क्षेपतः।

एकदा प्रस्तावे द्वादशवर्षीयो दुर्भिक्षः पतितः, तदा श्री सङ्घं सीदन्तं दृष्ट्वा, वज्रस्वामिना विद्याबलेन पृथुलं पटं विस्तार्य, तदुपरि श्रीसङ्घं समुपवेशयित्वा, आकाशमार्गेण माहेश्वरीनगर्यां बौधराजधान्यां श्रीसंघः प्रापितः, तदा बौद्धाः श्वेताम्बर दर्शनिनं दृष्ट्वा, क्रोधोद्भूता[१] जाताः, तदा देशमध्ये एवमुद्घोषितं अहो श्वेताम्बरियाणां श्रीपर्व समायाता सन्ति, अतः कारणात् श्वेताम्बरचैत्ये पुष्पाणि नो दातव्यानि, तदवसरे श्री सङ्घेन वज्रस्वामिनो विज्ञप्तम्, हे स्वामिन्! पुष्पं विना कथं जिनेश्वरस्य पूजां करिष्ये, तदा वज्रस्वामी श्रुतज्ञानोपयोगं दत्त्वा, हुतासनवने वायुवने च षट्ऋतुसमुदभूतानि पञ्चवर्णानि कुसुमानि ज्ञात्वा, देवतां समाराध्य, विंशतिलक्षपुष्पाणि विमाने भृत्वा, देवता आगत्य, वज्रस्वामिने अर्पयामासुः (मास)। तदा श्री सङ्घेन बहुप्रकारेण पूजा कृता, बौद्धानां मानं मर्दयित्वा। जिनशासनस्योन्नतिमेधयामास।

इति श्री पुष्पपूजायां श्री वज्रस्वामी कथा चत्वारिंशत्तमी समाप्ताः...४०

---

**कल्याणकन्दोद्भवनैकमेघं, समस्तसंकल्पविकल्पमुक्तम्।**

**स्फुरत्प्रतापं महनीयमूर्तिं श्रीमारुदेवं ऋषभं च वन्दे ।।१।।**

**कुन्तलश्रेष्ठिवत् तीर्थंकरपूजां स्वभावतः।**

**यः करोति जनः स स्यात्, कल्याणवनिताप्रियः ।।२।।अस्यार्थः-**

---

१. उद्भूतक्रोधा इत्यर्थः

यो भव्यजीव: शुभभावत:, श्रीतीर्थंकरस्य पूजां करोति, स भव्य: कल्याणं सुखं प्राप्नुयात्, कुन्तलश्रेष्ठिवत्, अत्र तत्कथा लिख्यते लेशत:।

मदनपुरनगरे तद्बहिरुद्याने श्रीऋषभदेवस्य प्रासादोऽस्ति, तत्र द्वे उष्ट्रिके निन्तरं उच्चै: स्वरेण रुदनं कुरुत:, तदा दृष्ट्वा राजाप्रमुख: सर्वलोक: विस्मयं प्राप्त:, तदवसरे कश्चन ज्ञानी गुरुस्तदुद्याने समवसृत:, राजा प्रजादयो वन्दितुं गता:, धर्मोपदेशं श्रुत्वा, राजा प्रपच्छ-कथय भगवन्! एते द्वे ऊष्ट्रिके, अस्मिने चैत्ये स्थित्वा, रुदनं कुर्वाते, तत्कारणं किं? तदा ज्ञानिभि: प्रोक्तं-रमापुरी नगरे, कुन्तलश्रेष्ठी वसति स्म, तस्य द्वे भार्ये, एका सोढी इति नाम्ना, द्वितीया मोढी नाम्ना, ताभ्यां सह श्रेष्ठी सांसारिकसुखं बुभुजे। अन्यदा स्त्रियोरग्रे भर्त्रा प्रोक्तं। हे प्रिये! युवां श्री जिनेश्वरस्य पूजां कुरुत। अहमपि करोमि, जिनपूजात: सद्गति: प्राप्यते, या लक्ष्मी: तीर्थंकरपूजार्थं व्यये भवेत् सा एव सफला, एवं कथितं, तथापि ते द्वे स्त्रियौ पूजां न कुरुत:, स्वकदाग्रहं न मुञ्चत:, प्राय: स्त्रीमध्ये हठ: पुरूषात् षड्गुणोऽधिको वर्त्तते, तस्मात् स्वामिवचनं (ते) न मन्येते, अथ द्वे स्त्रियौ मृत्वा एते उष्ट्रिके जाते । पुन: कुन्तलश्रेष्ठी मृत्वा, भीमभूपस्य पुत्र: त्वं जातोऽसि पूजाप्रभावात्। पुन: पूर्वभवस्य तव स्त्रियौ मृत्वा, उष्ट्रिके जाते पूजाया अभावात्, अधुना शोकं कुरुत:, एवं ज्ञानिवाक्यं श्रुत्वा उष्ट्रिकयो:, जातिस्मरणं उत्पन्नम्, पूर्वभवं ज्ञात्वा, गुरुसमीपे अनसनं गृहीत्वा, तीर्थंकरस्य पूजाध्यानतो मृत्वा, प्रथमं देवलोके देवौ जातौ,

इति श्रीस्नात्रपञ्चाशिकायां श्री जिनपूजायां कुन्तल श्रेष्ठिकथा, एकचत्वारिंशत्तमी ... ४१ समाप्त

---

**सौराष्ट्रदेशे खलु रत्नतुल्यं, सत्तीर्थयुग्मं वरिवर्त्तते च।**
**शत्रुञ्जयाख्यं गिरनारिसंज्ञं, नमाम्यहं तद् बहुभावभक्त्या ।।१।।**
**यत्नतो हेमसूरीशो जगौ दुस्थं कपर्दिकम् ।**
**भक्तामरस्य दशमं काव्यं स्मरोपवैणवम् ।।२।। अस्यार्थ: -**

कपर्दकनामा वणिक् दुस्थित: निर्धन: च, (तं) दृष्ट्वा हेमसूरीश्वरेण कथितं, अरे श्रावक! त्वं भक्तामरस्य दशमं काव्यं नित्यं स्मर, लक्ष्मीं प्राप्स्यसि । अत्र तत्कथा कथ्यते। अत्र स एव वणिक् श्रीयुगादिदेवस्य पूजां कृत्वाऽग्रे स्थित्वा, भावशुद्ध्या षण्मासं यावत्, दशमं काव्यं गुणयामास, एकस्मिन् दिने मध्यरात्रिसमये चक्रेश्वरी प्रसन्नीभूय, प्रोक्तं (क्तवती)-अरे वणिक् ! अहं तुष्टास्मि, जिनभक्तिप्रभावात्, तस्मात् त्वं मणप्रमाणान् द्वात्रिंशत् कुम्भान् गृहमध्ये स्थापये:, अहं कामधेनुर्भूत्वा आगमिष्यामि, त्वं भिन्नभिन्नघटमध्ये दुह्या:, प्रातर्वेलायां ते सर्वेपि घटा: स्वर्णपूरिता द्रक्ष्यन्ते, एवं कथयित्वा,

चक्रेश्वरी कामधेनूरूपं कृत्वा, आगता , कपर्दकेन दोहिता, द्वात्रिंशत् कुम्भा दुग्धेन भृता: पश्चात् कपर्दकेन पृष्टम् हे स्वामिनि ! यदि तवाज्ञा भवेत्, तदा एक दुग्धभृतकुम्भेन राज्ञ भोजनं कारयामि, तदा देव्या प्रोक्तं तथास्तु, पश्चात् प्रभातसमये कपर्दिकश्रेष्ठिना राजानं बहु परीवारयुतं समाकार्य परमाकार्य, परमान्नेन भूपो भोजित:। नृपोत्यन्तं संतुष्टो जात:, एक त्रिंशत् घटा: स्वर्णभृता: भूपस्य दर्शिता: । पुन: समस्तवार्ता कथिता, भूपोपि चमत्कारं प्राप्त:, भूपेन तुष्टमनसा श्रेष्ठिनं सन्मान्य, सद्वस्त्रे परिधापिते, नगर श्रेष्ठिपदे स्थापित:, एवं तीर्थंकरपूजाया भक्तामरस्य च महिमानं श्रुत्वा, राजा गृहे आगत: नगरेपि पूजामहिमा वर्धित:।

इति श्री स्नात्रपञ्चाशिकायां कपर्दकश्रेष्ठिकथा द्वाचत्वारिंशत्तमी...४२ समाप्ता

---

**गजपुरे विश्वसेनेशकुलभूषणं, रुचिरमचिराङ्गरुहमनघमृगलक्षणम्।**
**षष्ट्यधिकहस्तशतवपुषमुत्तम-सुखं शान्तिनाथं गाङ्गेयत्विषं ।।१।।**
**वानेयै: कुसुमै: पूजां, रचयन् भव्यमानव:।**
**कर्बाटिक प्रियेवाऽऽशु, लभते सुखसन्ततिम् ।।२।। अस्यार्थ:**

यो भव्यो वनोद्भवै: कुसुमै र्जिनं पूजयति, स भव्य: सुखसन्ततिं लभते, कर्बाटकप्रियावत्। अत्र तच्चरित्रं कथ्यते,

श्रीपुरनगरे अमरभूपालो विद्यते, तस्य पुत्री कलावती, तया एकस्मिन् दिने काष्टभारं वहन्तं एकं कर्बाटिकं दृष्ट्वा, जातिस्मरणं प्राप्तम्, तदा स्वीयं मस्तकं धूनयति स्म, तदा राज्ञा पृष्टं-हे कलावति! कथं त्वया मस्तकं धूनितं? तदा पुत्र्या प्रतिपादितं-हे तात! एक: कर्बाटिक: काननेऽभूत्, तस्य भार्यापि काष्ठभारं वहित्वा, आजीविकां चक्रे, एकदा नद्यास्तीरे तीर्थंकरबिम्बं दृष्ट्वा तया पतिं प्रति प्रोक्तं -अहो नाथ! अर्हत्प्रतिमा आवाभ्यां पूज्यते, अस्य पूजात: स्वर्ग-मोक्षादिकं प्राप्यते, तदा कर्बाटिकेन प्रोक्तं, रे रण्डे ? मौनं कुरु, तदा कर्बाटिकभार्यया नदीजलं समानीय, परमात्मशरीरे स्नात्रं कृत्वा, पुनर्वनपुष्पाणि लात्वा, प्रभुकण्ठे समारोप्य, बहुमानत: पूजा कृता, तत्प्रभावात् अहं तव पुत्री जाता, पुनरयं कर्बाटिक: काष्ठभारवाहक एव वर्तते, यदि जिनपूजा अनेन न कृता, तदा दु:खितोऽयं जात:, पुनस्तस्मिन् समये कलावत्या इयं गाथा कथिता-

अडवीहि पत्तीजईहिं जल, तोई न वुढा हत्थ।
अज्जवी एह कणसि छाडीय दीस इण्ह अवत्थ ।।१।।

एवं श्रुत्वा राजा कर्बाटिक: नृपकुमरी प्रमुखा: समस्तलोका: जिनपूजां कर्तु लग्ना:। सुखाभिलाषुकत्वात्

इति श्रीस्नात्रपञ्चाशिकायां पुष्पपूजायां कर्बाटिकप्रियाकथा चत्वारिंशत्तमी।४३।।

---

**आतपत्रत्रयं चारवश्चामराः,**

**कोटिसङ्ख्या सञ्जाता अभितश्चाऽमराः।**

**अनुपहतदुन्दुभिध्वनितमच्युतपदे,**

**यदतिशयराजिरेखा न केषां मुदे ।।१।।**

**अशोको मालिकः पूजां, यथा चक्रे जिनेशितुः ।**

**तथा भव्यजनैः कार्या, कल्याणसुखहेतवे ।।२।। अस्यार्थः -**

यथा अशोकनाममालाकारेण जिनस्य पूजा कृता, तथैव भव्यजनैः कल्याण ध्रुवसुखप्राप्त्यर्थं जिनपूजा कर्तव्या। अत्र तत्कथा लिख्यते।

सुकुमालपुरे बहवो धनवन्तो व्यवहारिणः परिवसन्ति स्म। ते सर्वे एकत्रीभूय, श्रीपर्युषणापर्वणि समागते श्रीआदीश्वरचैत्ये महामहोत्सवं कुर्वतो दृष्ट्वा, अशोकमालिकेन चित्ते चिन्तितम्-धन्या एते श्राद्धाः ये भव्या नित्यं जिनपूजां कुर्वन्ति। धर्माणां महोत्सवान् विदधति-पुनरहं कष्टेन उदरं बिभर्मि, तदा जिनेश्वरस्य भक्तिर्मत्तः कथं भवेत्, मया प्राग्भवे सुकृतं नो विहितं, तेनेह भवे दुःखी भूतोस्मि, एवं चिन्तयित्वा प्रत्यग्रकुसुमैः बहुभावभक्त्या भगवान् पूजितः, प्रपूज्य च अशोकमालिकः स्वगृहे आगतः, पूजां अनुमोदयन् सन्, रात्रौ मृत्वा, सुरलोके देवोऽभूत्, ततश्च्युत्वा मालवदेशे कुसुमपुरे नवशतपुराणां अधिपतिर्भूपोऽभवत्, अनया रीत्या नवभवपर्यंतं राज्यसंपदं प्राप्य, सुखमुपभुज्यानुक्रमेण मोक्षं प्राप्तः। यतः पूर्वं नवाङ्गे नवभिः प्रसूनैः पूजा कृताऽशोक मालिकेन। ततो नवसु भवेषु लक्ष्मीं, नवां नवां प्राप्य शिवं च भेजे।

इति श्रीस्नात्रपञ्चाशिकायां जिनपूजायां अशोकमालिककथा चतुश्चत्वारिंशत्तमी ..४४

---

**शान्तिमुपशान्तिभवभूरिभय परिभवं,**

**भुवनवनसुघनघनवारिवरवैभवम्।**

**परमशममिंदुसममसममहिमोदधे**

**र्नन्तु मिहामनतामहं शं स दधे? ।।१।।**

**यः पुष्पैरर्चते नाथं, मनः कृत्वा सुनिश्चलम् ।**

**इहैव लभते सौख्यं, शीघ्रं सिंहनरेशवत् ।।२।। अस्यार्थः -**

यः पुरुषः पुष्पैः नाथं जिनेश्वरं अर्चते, सुनिश्चलं मनः कृत्वा, स नरोऽत्र भवे शीघ्रं

सौख्यं लभेत सिंहनरेन्द्रवत्, अत्र तत्कथा वर्णेन विन्यस्यते।

सिंहपुरनगरे अल्पसिंहधरोऽल्पबल: सिंहराजा राजते। तदीयराज्यग्रहणार्थं श्रीअवन्तिनगरीशो धनेश्वरभूपो बहु सैन्यं लात्वाऽकस्मात् समागतस्तदवसरे सिंहभूप: श्रीजिनार्चां कुरुते, नवनवकुसुमै: प्रभु: पूज्यते (प्रभुं पूजयति) पुन: पुन: श्री जिनेश्वरस्याभिधानं जपति, प्रभुसन्मुखं स्वीयदृष्टिं विन्यस्यैकाग्रमनसा ध्यानं ध्यायन्, (आस्ते) श्रीजिनशासन स्याधिष्ठायको यक्ष:, तत्रागत:, (तेन) तथाकृतं यथारिभूप: पलाय्य स्वपुरे गत:, तज्जिनपूजा-महिमानं सिंहभूपेन प्रत्यक्षं निरीक्ष्य भूप: विशेषत: परमात्मानं पूजयामास। तत्पूजा-प्रभावाद् बहु पुण्यमुपार्जयामास। भवे भवे वर्धमानं राज्यं भुक्त्वाग्रे मुक्तिसुखं प्राप्स्यति।

इति भट्टारकउदयोदधिसूरीश्वरविरचितायां सम्यक्त्वदीपिकायां स्नात्र पञ्चायाशिकायां सिंहनृप कथा, पंचचत्वारिंशत्तमी ... ४५

---

**ते भव्यसत्वा बहुभावभक्त्या, त्रियोगशुद्ध्या सुदृढैकचित्ता:।**
**श्रीआदिदेवस्य पदाम्बुजानां, प्रपूजनं ये रचयन्ति नित्यम्।।१।।**
**स्वर्गस्तस्य गृहाङ्गणं सहचरी, साम्राज्यलक्ष्मी: शुभा।**
**सौभाग्यादिगुणावलि र्विलसति स्वैरं वपुर्वेश्मनि ।**
**संसार: सुतर: शिवं, करतलक्रोडे लुठत्यञ्जसा**
**य: श्रद्धाभरभाजनं जिनपते: पूजां विधत्ते जन:।।२।।(सिन्दूर प्र. ९०)**

सुगमार्थ:-अत्र तत्कथा प्रतिपद्यते

वर्धमानपुरनगरे बहवो धनाढ्या इभ्या व्यवहारिण: सन्ति ये कोटिध्वजव्यवहारिण:, ते दुर्गमध्ये वसन्ति, ये पुनर्लक्षेश्वरा व्यवहारिणस्ते दुर्गबाह्ये वसन्ति, तन्मध्ये श्रीमालगोत्रिक: पाजा नाम्ना कोटिध्वज: एकोऽवतिष्ठते, तेनाऽऽरसपाषाणमयं सहस्रस्तम्भयुक्तं श्री वर्धमानस्वामिनश्चैत्यं कारयितुं प्रारब्धं, तत्र चैत्ये बहव: कर्मकरा: समागच्छन्ति, भूपस्य दुर्गे स्तोका कर्मकरा: सन्नियन्ति, भूप: कर्मकराणां निवारयति, यूयं श्रेष्ठिचैत्ये माऽऽगमिष्यथ: दुर्गकरणार्थं शीघ्रमागच्छध्वं, तथापि कर्मकराश्चैत्ये बहवो गच्छन्ति, एवं कियद्दिनै: प्रासाद: संपूर्णो जात:, तदा चैत्यं सहस्रस्तम्भशोभायमानं, दण्डकलशध्वजालङ्कृतं, निरीक्ष्य श्रेष्ठिना चैत्यमध्ये मम्माणि (मणि) श्रीवीरबिम्बं प्रतिष्ठाप्य स्थापितम्। तदवसरे भूमिपाल: पाजा श्रेष्ठिनश्चैत्य-दर्शनार्थमागत: जिनगृहं निरीक्ष्य हर्षितो राजा एवमुवाच-हे श्रेष्ठिन्! धन्यस् त्वं धन्यस् त्वं येनेयन्मात्रं द्रव्यं धर्मस्थाने व्ययीकृतं, त्वत्सदृशो धर्मात्माऽन्य: कोऽपि नास्ति, एवं बहुधा

श्रेष्ठिनं सन्मान्य, नृप: स्वगृहे आगत:, पाजा श्रेष्ठी नित्यं जिनं पूजयामास प्रान्ते चारित्रं गृहीत्वा, मोक्षभागभूत्

इति श्री जिनपूजायां श्रेष्ठिकथाषड्चत्वारिंशत्तमी ... ४६

---

**स्वस्ति श्रियां धाम गुणाभिरामं, सुत्रामसन्ताननताङ्घ्रिपद्मम्।**

**जाग्रत् प्रतापं [१]जगतीतनेत्रं श्रीगोडिपार्श्वं सततं श्रयामि।।१।।**

**इहलोके जिनेद्रार्चां, कुर्वाणो भव्यमानव: ।**

**श्रीनागार्जुनयोगीश इवाप्नोति स्ववाञ्छितं ।।२।। अस्यार्थ:**

इहलोके श्री जिनेश्वरस्य अर्चां कुर्वन्, भव्यमानव: स्ववाञ्छितफलं प्राप्नोति, नागार्जुनयोगीन्द्रवत्-अत्र तत्कथा कथ्यते।

पादलिप्तपुरे नागार्जुनयोगी संतिष्ठते तेन रससिद्धि: साधितुमारब्धाऽस्ति, तदौषधीनां रसं कृत्वा यावदातपे मुञ्चति तावत्, वीर: पक्षिरूपं कृत्वा, तद्रसं भूमौ ढोलयति, प्रक्षिपति च, एवं कुर्वति सति बहुदिनानि जातानि,

अथान्यदा श्रीपादलिप्ताचार्या: प(पा)क्षिकापारणे श्री शत्रुञ्जययात्रार्थं श्रीपादलिप्तपुरे समागता:, तस्याचार्यस्य विद्यावन्तं (विद्यावत्तां) ज्ञात्वा नागार्जुन योगीन्द्रेणाभिवन्द्य पृष्टं- हे पूज्य! त्वं कथय, मदीयविद्यातो रससिद्धि र्न जायते, तस्मात् कश्चिदुपायं यूयं कथयत, येनाऽसुरव्यन्तरवीरनरकृतान्युपद्रवाणि विलियेत् (विलियेयु:) तदा पादलिप्ताचार्येण प्रोक्तं-कान्तिनगरमध्यभागे। बृहच्चैत्यं वर्त्तते, तन्मध्ये श्रीपार्श्वप्रतिमा समस्ति, तां दृष्ट्वा त्वं विद्यां साधय, कोप्युपद्रवं कर्तुं न शक्नोति, विद्यासिद्धो भविष्यसि, तदा योगीश्वरपार्श्वे आकर्षणविद्यास्ति, तया विद्यया प्रतिमाऽऽनीता, ताम् प्रतिमां स्थापयित्वा(तस्या:) अग्रे विद्या साधिता, रसनिष्पत्तिर्जाता पश्चात्, तां प्रतिमां प्रपूज्य सेढिकानदीतीरे पलासवृक्षाधस्तले, स्थापिता ।

पुन: कालान्तरे श्रीअभयदेवसूरिशरीरे गलत्कुष्टव्याधिरुपन्नोऽभूत्, शासनदेवी वचनात्, तत्र बहुसङ्घेन सार्धं गत्वा, तदा अभयदेवसूरिणा, जयतिहुयण 'स्तोत्रं कृत्वा, श्री पार्श्वनाथप्रतिमा प्रकटीकृता, तत्र श्रावकै: स्नात्रपूजा कृता, स्नपनजलेन सूरिशरीरं सिञ्चितम्। तदा काञ्चनवर्णिकाकाया जाता, महान् महिमा वर्धित:, अद्यापि स्तम्भनतीर्थे सा प्रतिमा स्तम्भनकपार्श्वनाथाभिधाना पूज्यमाना विद्यते।

इति श्री भट्टारकविजयोदधिसूरिविरचितायां सम्यक्त्वदीपिकायां स्नात्र-पञ्चाशिकायां नागार्जुनयोगिकथा, सप्तचत्वारिंशत्तमी ... ४७

---

१ जगति इतं व्याप्तं नेत्रं ज्ञानात्मकं यस्य स: इति विग्रह: कार्य:

**अवंध्यं त्रिसंध्यं जिनं पूजयन्तं, हरन्तं दुरन्तं प्रमादं स्फुरन्तं।**

**जिनं नाभिभूपालवंशावतंसं, श्रये तं शरण्यं शिवाम्भोजहंसम्।।१।।**

**यान्ति दुष्टदुरितानि दुरतः कुर्वते सपदि संपदां पदं।**

**भूषयन्ति भुवनानि कीर्तयः, पूजया विहितया जगद्गुरोः।।२।। अस्यार्थः-**

दुष्टदुरितानि दुरतो यान्ति सपदि तत्कालं संपदां पदं कुर्वन्ति, कीर्तयः भुवनानि भूषयन्ति, जगत्गुरोः पूजा विहिता सति। अत्र कथा-

शङ्खाभिधं नगरं, तत्र शङ्खराजा, तत्पुत्रो मदनकुमारः महारूपवान्, सर्व कलाप्रवीणः, पित्रा समस्तशास्त्राणि पाठितः, कर्मयोगेन मदनकुमरशरीरे कुष्ठो व्याधिरुत्पन्नः। तदा तीव्रवेदना प्रादुर्भूता, बहूपायाः कृताः, परं सर्वेपि निष्फला जाताः। तदा भूपेन कस्यचित् साधोः पृष्टं-मत्पुत्रदेहे कथं निरोगत्वं भवेत्? गुरुभिः प्रोक्तं-यदा श्री पार्श्वनाथस्याष्टप्रकारिपूजां कृत्वा, तत्स्नपनजलेन, कुमारस्याङ्गं सिं(सि)च्यात् षण्मासं यावत्, तदा निरोगी तव पुत्रो भविष्यति-एवं श्रुत्वा भूपालेन तथैव कृतं, शरीरे निरोगी जातः, अद्भुतं रूपं जातम्, पश्चात् शङ्खराजादयः समस्तलोकाः जिनपूजां कर्तुं विशेषेणोद्यता अभवन्, मदनकुमारोऽपि जिनपूजां कृत्वा, सद्गतिं प्राप्तः।

इति श्रीस्नात्रपञ्चाशिकायां श्री जिनपूजायां शङ्खनृप-मदनकुमारकथा अष्टचत्वारिंशत्तमी ... ४८

---

**श्रेयःश्रीसदनं शशाङ्कवदनं, शश्वज्जगद्वन्दनम्**

**नीलाब्जाभतनुं प्रवालरदनं वामाऽबलानन्दनम्।**

**सिद्धेः संवननं कृतान्तकदनं संपूज्य संक्रन्दनं (?)**

**गोडीपार्श्वजिनं स्तुवेऽघशमनं भव्याङ्गिसच्चन्दनम्।।१।।**

**जिनाधिपार्चया भावात्, कृतया भविनामिह।**

**यान्ति कुष्ठादयो रोगा, पाल्हभूमिपतेरिव ।।२।। अस्यार्थः-**

श्रीजिनेश्वरस्य पूजा भावात् कृता सती इहभवे कुष्ठादिरोगान् विनाशयति पाल्हणभूमीशवत्-अत्र तत्कथाऽभिधीयते-

प्रह्लादनपुरे प्रह्लादनो राजा महाबलवान् अभूत्, एकदा प्रस्तावे अर्बुदाचल-दर्शनार्थं भूपो गतः, तत्र कुमारपालभूपालेन कारितः श्रीपार्श्वनाथस्य प्रासादो दृष्टः, तन्मध्ये रीरीमयं श्रीपार्श्वबिम्बं भूपेन भञ्जयित्वा महेश्वरस्य पुरतो वृषभं कारयित्वा, शिवालये स्थापितः। एवं कृत्वा प्राल्हणः भूपालः स्वगृहे यावत् समागतः, तावद् भूपस्य देहे गलत्-कुष्ठरोगः प्रादुर्भूतः, महद(महती)वेदनाविर्भूता, तदा गङ्गादितीर्थजलैः भूपः स्नापितः, परं

गलत्कुष्ठव्याधिर्न गतः। भूपोऽतिव्याकुलोऽभूत्, ततोऽन्यदा रोगोपशमनकारणं भूपेन साधूनां पृष्टं, तदा साधुभि र्निगदितं - प्रह्लादनपुरे श्रीपार्श्वनाथस्य चैत्यं कारयित्वा, तन्मध्ये श्रीपार्श्वबिम्बं प्रतिष्ठाप्य, यदा त्वं पूजां कुर्यास्तदा तव देहे रोगस्य नाशो भवेत्, एवं श्रुत्वा त्वरितं देवालयं कारयित्वा, मध्ये काञ्चनमर्यी मूर्त्तिं स्थापयित्वा प्रतिदिनं बहुभक्तितो भूपो पूजां चकार एवं प्रभुं पूजयतः भूपस्याङ्गस्य कुष्ठव्याधि र्गतः। सुवर्णवद् देहोऽभूत्, भूपः परमभक्त्या श्राद्धो जातः।

इति श्री भट्टा० उद० सम्यक्त्व० स्नात्र० प्रह्लादनभूपकथा एकोन-पञ्चाशत्तमी...४९

---

**विमलगिरिवतंसः, सिद्धिगङ्गाम्बुहंसः,**
**सकलसुखविधाता, दर्शनज्ञानदाता।**
**प्रणतसुरनरेन्द्रः, केवलज्ञानचन्द्रः**
**सृजतु मुदमुदारं नाभिजन्मा जिनेन्द्रः ।।१।।**
**शुद्धभावेन कर्तव्या, पूजा श्रीमज्जिनेशितुः**
**श्रेणिकक्ष्माभुजेवात्र, पुंसा मुक्तिसुखार्थिना ।।२।। अस्यार्थः-**

भव्यैः सदा शुद्धभावेन श्री जिनेश्वरस्य पूजा कर्तव्या, श्री श्रेणिकनरेन्द्रवत्। अत्र तत्कथा लेशतो लिख्यते-

एकदा प्रस्तावे राजगृहीपुराद् बहिः श्री इन्द्रभूतिर्गणधरः समावासार्षीत्, तदा श्री श्रेणिकभूपो वन्दनार्थं गतः, यथोचितस्थाने समुपविष्टः, गणधरेण देशना दत्ता, तन्मध्ये श्री जिनपूजाया फलं वर्णितं यथा-

जो पूएइ तिसंझं जिणिंदरायं तहा विगमदोसं
तईयभवे सिज्झइ अहवा सत्तऽट्ठमे जम्मे ।।२ ।। अस्यार्थः-

यः पुरुषः त्रिकालं त्रिसन्ध्यं विगतदोषं जिनेन्द्रं पूजयति, स भव्यजीवः तृतीयभवे अथवा सप्ताष्टभवमध्ये सिध्यति, एवं श्रुत्वा श्रेणिकनरेन्द्र एवमभिग्रहं जग्राह-जिनपूजनं विना भोजनं नो करिष्ये, पानीयमपि नो पास्यामि, एवं हृदये धृत्वा, श्रीवीरजिनेश्वरस्य मूर्त्तिं कारयित्वा, प्रातः समये चन्दनेन पूजां विधाय, अष्टोत्तरशतस्वर्णमयजवान् कारयित्वा तेषां स्वस्तिकं वीरस्याग्रे पूरयति, पश्चात् प्रशस्तस्तोत्राणि कथयति, एवं द्रव्यपूजां भावपूजां च कुर्वता श्रेणिकभूपेन तीर्थंकरनाम कर्म बद्धम् पुनरग्रे मोक्षं प्राप्स्यति-

इति श्री देवपूजायां श्रेणिकनृपकथा पञ्चशत्तमा समाप्ता ... ५०

इति श्री जिनेन्द्रपूजा विषये श्री विधिपक्षगच्छाधिराजभट्टारक उदयोदधिसूरीश्वर विरचितायां सम्यक्त्वदीपिकायां स्नात्र पञ्चाशिकानामा ग्रन्थः समाप्तः।

## (प्रशस्ति)

जयति भुवनैकसूरः, सर्वत्र विहितकेवलालोकः
नित्योदयः स्थिरस्तापवर्जितो वर्धमानजिनः ।।१।।
श्री वीरवक्त्रात् त्रिपदीमवाप्य, यो द्वादशाङ्गीं विमलां चकार।
स्वामी सुधर्मा स[१] कर्षि ? शास्ता, जीयात् स्वकीयान्वयवृद्धिकर्त्ता।।२।।
चान्द्रे कुले श्री विधिपक्षगच्छस्तत्राऽभवत्साधुपधर्ममूर्तिः।
तदीयपट्टे शिवसिन्धुसूरिस्-तत्स्थानके श्रीअमराब्धिसूरिः ।।३।।
तत्पट्टाम्बुजभास्करा भृशधियो दुर्वादिदन्तावल-
हर्यक्षा उपकेशवं शततुषो रोषादिदोषद्विषः ।
निर्णीतागमशब्दशास्त्रविषया उद्योगिनोऽध्यापने,
विद्यासागरसूरयो युगवरा विश्वप्रियाः स्वर्ययुः ।।४।।
तत्पदाम्भोजमधुपः सूरिश्रीउदयोदधिः ।
स्नात्रपञ्चाशिकाग्रन्थं रचयामास हर्षतः ।।५।।
वर्षेऽब्धि खाहीन्दुमिते सुरम्ये, श्रीपोषमासे धवले सुपक्षे,
श्री पूर्णिमायां, शशिवासरे च श्री पादलिप्ताख्यपुरे सुराष्ट्रे ।।६।।
प्रत्यक्षर गणनया ग्रन्थमानं विनिश्चितम् ।
अनुष्टुभां त्रयोदशशती सङ्ख्यमुदीरितं ।।७।।
श्रीयोगविमलसाधोस्तथा श्रीदर्शनाम्बुधेः ।
अभ्यर्थनया रचितो, ग्रन्थोयं बोधिलब्धये ।।८।।
श्रीमालिवंशे गुरुदेवभक्त कीकासुतः सा० कचराभिधानः ।
तदीयसङ्घेन समं च यात्रां, कुर्वन् कृतोऽयं जिनराजभक्त्यै ।।९।।
यावल्लवणसमुद्रो, यावन्मेरुमहीधरः ।
यावच्चन्द्राऽऽदित्यौ तावन्नन्दत्वयं ग्रन्थः ।।१०।।
अर्हन्तो मङ्गलं मे स्युः, सिद्धाश्च मम मङ्गलम् ।
साधवो मङ्गलं मे स्युः जैनो धर्मोस्तु मङ्गलम् ।।११।।

इति श्री प्रशस्तिः समाप्ताः।।

संवत १८५४ वर्षे, मासोत्तममासे, आशुमासे शुक्लपक्षे चतुर्दश्यां निशापति-वारे ।।
ली.कल्लारामनाथ। नागौरमध्ये ।। संवत १९५७

१. स्वमहर्षि इति चेत् पाठः, सुष्ठु।

# खण्ड-२
# यशोप्रज्ञादर्शनम्

## परमज्योतिः पञ्चविंशतिका

- *मूलकाराः महोपाध्यायश्रीयशोविजयपादाः
- वार्त्तिककाराः आचार्यश्री कल्याणबोधिसूरयः

साम्प्रतं ज्योति:परमज्योतिषोर्विवेकमेव व्यक्ततरं व्याख्यान्ति-

**प्रभा चन्द्रार्कभादीनां, मितक्षेत्रप्रकाशिका।**
**आत्मनस्तु परं ज्योति-र्लोकालोकप्रकाशकम् ।।२।।**

न हि मेर्वन्तरितः सूर्यारदिरत्रत्यं प्रकाशयति क्षेत्रम्, नाप्यत्र स्थित एष मेर्वन्तरितं क्षेत्रम्, तदविषयत्वात्। सैषा ज्योति:कथा, परमज्योतिषस्तु तामाह - आत्मन इत्यादि । मा भूत्तदितरस्मिन् परमज्योतिराश्रयत्वभ्रान्तिरित्ययं स्पष्टो निर्देशः। अयमात्मैव शुद्धकाष्ठां प्रापितो विश्वमपि विश्वं प्रकाशयति, अस्यैव परमदीपाद्युपमोपमेयत्वेन परमज्योति-र्भूतत्वादिति हृदयम्, अत एवाहु: परमात्मस्तवे-

निर्धूमवर्त्तिरपवर्जिततैलपूरः, कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि।
गम्यो न जातु मरुतां चलिताचलानां, दीपो परस्त्वमसि नाथ! जगत्प्रकाशः ।।

- इति (भक्तामरस्तोत्रे)

अत्र लोक इति जीवादिद्रव्याऽऽधारभूतोऽवकाशः, अलोकस्तु तद्व्यतिरिक्तः, नि:सीमक्षेत्रश्च सः, गगनस्यानन्तत्वात्। लोकालोकप्रकाशकत्वं चात्मनो ज्ञस्वभावत्वात्, प्रतिबन्धकाभावे तत्स्वभावाऽऽविर्भावस्य नैसर्गिकत्वात्। उक्तञ्चज्ञो ज्ञेये कथमज्ञः स्यादसति प्रतिबन्धके?। दाह्येऽग्निर्दाहको न स्यादसति प्रतिबन्धके?-इति। अतोऽभ्युपेयमस्य तत्प्रकाशकत्वमिति।

---

* पू.आचार्यदेवेशश्रीमद्विजयभुवनभानुसूरि साम्राज्यवर्त्ती।

# वृत्तं यशोविजयवाचकपुङ्गवानाम्

- *मुनिश्री सम्यग्दर्शनविजयगणिः

पुनस्तत्र कनोडानगरे रात्र्यां चन्द्रिकाकान्तामिलनाऽऽनन्दितश्चन्द्रः सर्वजनानानन्दयति। यतः शुक्लपक्षे हिमरुचिस्त्रियामाप्रारम्भे गगनेऽभितः प्रसरति। चण्डाशुस्तदा दिनभ्रमणजनितश्रमश्रान्तः, ध्वान्तपङ्कहरणाशुचिगात्रशुद्धिव्याजेन वारिधिं गतः। शीतरुचेरुदयेन चक्रवाकमिथुनानि प्रमुदितानि। कुमुदिनीखण्डं समुल्लसितम्।

सन्ध्यायां लोहितवर्णं गगनं सञ्जातं, तदपि दिनमणिकिरणकुङ्कुमविलिप्तमिव। सूर्यसख्यभाजो नलिनीवनस्य शोभाऽपि तेन खण्डिता। कौशिका अपि मार्गे निराबाधं विचेरुः। काका मूकतां ययुः। सूर्यविरहेण स्वेच्छाचारिणः प्रमुदिताः, किन्तु स्वकार्यसिद्धिप्रतिबन्धकीभूतं शीतांशुं दृष्ट्वा प्रियामिलनोत्कानपि विरहसंतप्तान् तान् मृदुसितकरनिकरा अपि, मुर्मरा इव ज्वालयन्ति।

तत्र नागरा अपि शोभागुणसमुदायसमन्विताः, धनधान्यादिसमृद्धिसम्पूर्णाः ज्ञानविज्ञानचातुर्यविचक्षणताधरितबृहस्पतयः सन्ति। निवसन्ति नैके धन्या नरा लक्षणशास्त्रप्रोक्तसुलक्षणलक्षिताः। तेषां चरणतलं रक्तवर्णं, सरलं, कमलाभं, मृदु, कोमलं सुश्लिष्टं, प्रशस्तम्, पादतले रासभवराहशृगालाङ्किता दुःखिनो भवन्ति। तेषां नखा उत्तुङ्गाः पृथुलास्ताम्राः, स्निग्धा दर्पणनिभाः सन्ति,

तेषां कूर्मवदुन्नत-घन-स्निग्ध-मांसल-सम-कोमल-सुश्लिष्टौ चरणौ, ते हंस-शिखि-मातङ्ग-वृषभगत्यनुकारिणः, तेषां जानुद्वयं गूढं, गुल्फौ सुसमाहितौ कटीतटम् तु मांसलं विस्तीर्णं शुभमस्ति। तेषामुदरं सिंहव्याघ्रमयूरवृषमत्स्यादितुल्यं, वृत्तमस्ति। नाभिः गम्भीरा, दक्षिणावर्ता सुन्दरा विद्यते वक्षःस्थलमपि विशालमुन्नतं तुङ्गं स्निग्धलोमं समार्दवं धन्यं, सिंहाऽश्वमातङ्गतुल्यं तेषां कण्ठः शङ्खसंनिभः, वलित्रयविराजितः सौभाग्य-

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

वृद्धिकरोस्ति, तेषां दन्ता अपि शुद्धाः समाः शिखरिणः स्निग्धाः घनाः संपूर्णाः शुभाः सन्ति।

तेषां रसना कमलदलरुचिः, सूक्ष्मा चास्ति। तेषां तालु मनोहरं पद्मदलसच्छायं, तेषां हंससारसनादानुसारिस्वराः।

तेषां धन्यानां दृष्टिः इन्दीवरतुल्या गम्भीरा, विपुला च विद्यते।

तेषां विपुलश्चन्द्राभो सम्पत्तिकरः ललाटः, अस्ति तेषां केशाः मृदुस्निग्धाः सुखदाः, कुञ्चिताः श्यामलाः सन्ति, किंबहुना! सर्वसुपुरुषलक्षणसुभगास्ते सन्ति।

तत्र योषितामपि पादतलं चक्रपद्मध्वजछत्रस्वस्तिकवर्धमानाङ्कितं।

श्लक्षणसंहतसुवृत्तरक्ताऽनतिदीर्घाङ्गुलयः। पीनौ, सुसंहतौ, स्निग्धौ, सिरा-रोमवर्जितौ, हस्तिहस्तनिभौ प्रशस्तौ जङ्घोरु। विस्तीर्णमांसला, गुर्वी, चतुरस्राऽतिशोभना, समुन्नतनितम्बा प्रशस्ता कटिः। उदरं मध्येलघु एवं सुन्दर्यस्तत्र सर्वाशामण्डनभूताः ।

एवं कनोडानगरवास्तव्या बहुनराः नार्यश्च प्रायः सुलक्षणाः नार्यश्च सौन्दर्य-सल्लक्षणशीलादिगुणविभूषिता आसन्।

तत्रानल्पधना नागरा नगरश्रेष्ठिवत्, श्रेष्ठिनो महामात्यवत्, महामात्यो भूपतिवत्, भूपतिस्तु देववत्।

षड्ऋतुपुष्पफलजलक्रिडावापीक्रीडागिरिप्रभृतिविलासस्थानानिन नैकानि विरा-जन्ते। द्विकत्रिकचतुस्पथादिमहामार्गा नगरशोभां विवर्धयन्ते।

तत्र चौरजलवह्निमारिशाकिनीडाकिनीराजादिभयानामंशोऽपि न विद्यते। तत्रस्था नागरा लुब्धाः, किन्तु गुणलाभेषु न तु धनेषु। कोपनाः स्वदोषनाशने न तु मन्तुकृत्सु। सगौरवा जिनप्रभुधर्मप्राप्तेः, न तु ऐश्वर्यादिलाभात्। तत्र करपीडनमपि परिणयप्रसंगे, न तु राजद्वारे। एवं सर्वथा बहुगुणविभूषितं सद्भावविशुद्धं दोषविमुक्तं सर्वभयरहितं कनोडानगरं गूर्जरराष्ट्रे बहुप्रसिद्धिप्राप्तमस्ति स्म। (क्रमशः...)

# तत्वान्तम्

- *मुनिश्री किर्तीन्द्रविजयः

## १. स्वत्वं

निश्चयनये स्वत्वं साङ्कल्पिकं (वैज्ञानिकं) व्यवहारनये शास्त्रसिद्ध उपायजन्यः शिष्यक्षेत्रादौ आभाव्यानाभाव्यव्यवस्थानियामकः स्वपर्यायः स्वत्वं।

प्रतिग्रहादीनां स्वविषयदातृसङ्कल्पसंबंधेन स्वामिनिष्ठतया विजातीयस्वत्वहेतुत्वं तृणारणिमणिन्यायेन तेन बहुनां साधारण्येन दत्तस्यैकेन प्रतिग्रहेऽपि बहु सर्वसाधारण-स्वत्वोत्पतिनिर्वाहः।

एकस्यैव (बृहद्) वस्तुनो विभज्य प्रदाने यावदवच्छेदेन यत्र यस्मै दातृसङ्कल्पः तावदवच्छेदेन तत्र तदीयं स्वत्वं उत्पद्यते इत्येवं विशिष्य कार्यकारणभावो वाच्यः यत्र भागविशेषे सङ्कल्पस्तत्र भागविशेषे तन्नियतं। तत्र तावद् भागे एव तस्य स्वामित्वं, तेन समभागो विभागो निर्वहति। यत्र च भागविशेषोऽपि (एकहस्तादिरुपो) देशविशेषोपलक्षितः सङ्कल्पो विषयीक्रियते तत्र तद्देशीये तद्भाग एव तस्य स्वामित्वं-स्वत्वंनास्य देशभागग्रहणे साधूनां तृतीयमहाव्रतभङ्गः।

स्वत्वं-स्वामित्वं चोभयाश्रितपर्यापरुपं द्रव्यार्थनयेन, उभयानतिरिक्तं पर्यायार्थ-नयेन, चातिरिक्तं नानाविधपर्यायकरम्बितवस्तुव्यापकस्याद्वादप्रविष्टनयमहिम्ना नानाविधव्यवहारकारि।

नयभेदेन (स्वत्वाभाव) तदभावव्यवहारेऽपि वैचित्र्यं यथा **चैत्रस्य न धन**मित्येकमेव वाक्यं द्रव्यार्थवृत्ति-द्रव्यार्थउपचार-पर्यायार्थवृत्ति-पर्यायार्थोपचारभेदेन

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

यथा – १. धने चैत्रस्य स्वत्वाभावः ।

२. स्वत्वसंबंधेन धने चैत्राभावः ।

३. चैत्रे धनस्य स्वामित्वाभावः ।

४. स्वामित्वसंबन्धेन चैत्रे धनाभावः ।

५. धनाभावे चैत्रसंबन्धित्वम् ।

६. धनाभावे चैत्राधिकरणतादात्म्यं नानाविधबोधं जनयति भावाभावकरम्बित-वस्तुअभ्युपगमे न क्वापि दोषः ।

# यशोगूर्जरस्तवनानुवादः

-*मुनिश्रीआत्मदर्शनविजयः

(श्रुतज्ञानप्रचारकसभाप्रकाशनैर्वैक्रमीय २०७१ तमे वर्षे प्रकाशितगूर्जरसाहित्यसङ्ग्रह-पुस्तकस्थमहामहोपाध्यायश्रीयशोविजयगणिभी रचितगूर्जरस्तवनानां संस्कृतगद्यानुवादः क्रमशः प्रकाश्यतेऽत्र।)

६१. यः साधु धनोपायकथनरूपदेशनां ददाति धर्मशास्त्राणि निह्नुहवते, स मोक्षमार्गस्य लुण्टको व्यपदिश्यते; न तेन मोक्षमार्गो वाह्यते ।।६।।

**(१२५ गाथास्तवनम् ढाल-१, पृ.१३६)**

६२. यद् यदंशेन जीव उपाधिरहितो जायते, तत्-तदंशेन तस्य धर्मोऽपि सिध्यति। निरुपाधिकत्वं च जीवस्याऽऽचतुर्थगुणस्थानकाद् यावत् शिवसुखप्राप्तये भवति ।।२०।।

**(१२५ गाथास्तवनम् ढाल-१, पृ.१३६)**

६३. यावदाऽऽत्मद्रव्यस्य शुद्धलक्षणं ज्ञातं न भवति तावज्जीवेन तात्विकगुण-स्थानकमपि न प्राप्यते ।।२२।।

आत्मस्वरुपाज्ञानेन यद् भवदुःखं प्राप्यते, आत्मज्ञानेनैव तद विलीयते, एवं श्रद्धां विधेहि ।।२३।।

आत्मज्ञानावस्थां विना कायकष्टसंयमपालनदेहत्यागकरणेनापि न कदापि भव-दुःखं छिद्यते ।।२७।।

जगद्दर्शनेन चित्रं बहिरेव भ्रमति, आत्मदर्शनेनैव मोक्षपदं प्राप्यते ।।३१।।

अध्यात्मरहितं सर्वमपि योगक्रियाकष्टं केवलं देहमलतुल्यं निस्सारं कथ्यते ।।३३।।

**(१२५ गाथास्तवनम् ढाल-३, पृष्ठम्-२३८)**

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ति।

६४. निश्चयदृष्टिं हृदये स्थापयित्वा यो व्यवहारक्रियामनुतिष्ठति, कृतपुण्य: स जीव: शीघ्रं भवसमुद्रस्य पारं प्राप्नोति ।।५५।।

अत: सिद्धमेतद् यदुत व्यवहारमार्गविलोपनेन न कोऽपि निश्चयं प्राप्नुयात् ।।५८।।

**(१२५ गाथा स्तवनम् ढाल-५, पृष्ठम्-२४२)**

६५. याऽऽचरणाऽऽगमादनिषिद्धा भवति, अशठसंविग्नार्षपुरुषै: प्रवर्तिता भवति, तत्तत्कालगतसर्वगीतार्थैश्च बहुमानिता भवति, सैव शुद्धव्यवहारमार्गत्वेन व्यपदिश्यते।।६६।।

या चाऽऽचरणा केवलं निजबुद्धिविकल्पितैव भवति, यया च न भवपारं प्राप्येत, या चान्धपरम्परया बाधिता भवति, साऽऽचरणाऽशुद्धव्यवहारमार्गरुपा कथ्यते ।।६७।।

**(१२५ गाथा स्तवनम्, ढाल-६, पृष्ठम्-२४४)**

६६. साधुपर्युपासनजिनपूजनदानादिनि शुभकर्माणि प्रोच्यन्ते। तानि कुर्वन् श्राद्धोऽपि श्रेष्ठ: कथ्यते, न तु साधुवेषे पापकर्म कुर्वन् मुनिरिति ।।७७।।

**(१२५ गाथा स्तवनम्, ढाल-६, पृष्ठम्-२४५)**

६७. चरणकरणगुणहीनोऽपि यो मुनि:-लज्जया धृतं मुनिवेषं त्यक्तुं न शक्नोति, सोऽपि मुनिशुद्धगुणपक्षपातेन मार्गस्थ एव कथ्यते।

कथमेतदित्युच्यते,

शुद्धमुनिगुणपक्षपातेन स संविग्नपाक्षिकमुनिर्भवनिमित्तभूतं मृषावचनं ज्ञात्वा शुद्धमोक्षमार्गमेव प्रवदति। तथान्यसाधुभ्योऽभ्युत्थानादिविनयमगृह्णन् निजस्वरुप-स्थितान् रत्नाधिकान् वन्दते ।।७९।।

**(१२५ गाथा स्तवनम्, ढाल-७, पृष्ठम्-२४५)**

६८. स संविग्नपाक्षिकमुनि: शुद्धयतिगुणेषु दृढप्रतिबन्धेन यां यां यतनां शुद्धाचरणारुपां प्रतिपालयति, तथा तथा शुभभावं प्राप्य कर्मक्षयं कुरुते। एष भवभीरुमुनिर्लोकेषु स्वहीनतामेव दर्शयति, प्रशंसितोऽपि न जातिमदं करोति। एतदेव स्वोत्कर्ष श्रवेणनाऽमाद्यत्वं तस्य दुर्धरव्रतधारित्वमुच्यते ।।८०।।

शास्त्रेषु त्रिविधजीवेषु मोक्षमार्ग: प्रदर्शित:; तद्यथा, प्रथम: साधु: द्वितीय: श्रेष्ठश्रावक:, तृतीयश्च संविग्नपाक्षिक: मुनिरिति।

तथा त्रिजीवभेदेषु भवमार्गोऽपि निर्दिष्ट:, तद्यथा, प्रथम: सामान्यगृहस्थ:, द्वितीयो लिङ्गधारी मुनि:, तृतीयश्चान्यलिङ्गभृत्। एते त्रयोऽपि सर्वदोषाकरभूता भवन्ति ।।८१।।

**(१२५ गाथा स्तवनम्, ढाल-७, पृष्ठम्-२४५)**

६९. जिनपूजानुष्ठानं केवलं स्वरूपेण सावद्यं भवति, अनुबन्धेन तु निरवद्यमेव भवति; यतो जिनपूजाकाले जीवो जिनगुणबहुमानेन शुभध्यानेषु वर्तते ।।९०।।

**(१२५ गाथा स्तवनम्, ढाल-८, पृष्ठम्-२४७)**

७०. साधुर्भावस्तवकरण एवाधिकृतो भवति, न तु द्रव्यस्तवे। गृहस्थ एव द्रव्य-भावस्तवयोरधिकृतः कथितः ।।९४।।

**(१२५ गाथा स्तवनम्, ढाल-९, पृष्ठम्-२४८)**

७१. मम त्वयि योऽनुरागः स एव शिवतरोर्बीजमस्ति। तव पुरतोऽहं सुरनरवृन्दानपि नाधिकतरान् लक्षयामि ।।११६।।

तव वचनरागसुखं प्राप्याहं सुरनरगतिसुखमप्यकिञ्चित्करं मन्ये। दर्शितकोटिकपटैरपि तव शासनरागं नहि त्यक्ष्यामि ।।११९।।

हे प्रभो! तव तु कोटिसङ्ख्यका भक्ताः सन्ति, मम तु स्वामी त्वमेव एकः। अतो ममोपकारकरणे तवैवोचितविवेकोऽपेक्ष्यते ।।१२१।।

हे जगद्गुरो। तव पुर एकैव प्रार्थना क्रियते-यावन् मम मोक्षं, प्रतिभवं तव शुभचित्तेन चरणसेवा भूयात् ।।१२४।।

**(१२५ गाथा स्तवनम्, ढाल-११, पृष्ठम्-२५१)**

(क्रमशः)

# शामलापार्श्वनाथप्रभुस्तवनम्

- **मूलकारा: महोपाध्यायश्रीयशोविजयपादा:**
**गूर्जरलेखकौ यश:शिशू**
- ***अनुवादकर्त्री साध्वीजीश्री विरागदर्शनाश्री:**

पूज्योपाध्यायश्रीयशोविजयजीमुनि: मौलिकरचना: प्रभूता: कृतवान् तथा शोभनानुत्तमभावान् दधती: कृतीरनुसरन्त्यो रचना अप्यनेका: कृतवान्। विशेषत: गूर्जरभाषायामनुसरणात्मकरचना बह्व्यो दृश्यन्ते। स कुत्रचित् किमपि शोभनं शास्त्रं पठति, तर्हि तं स्वयमेव लिखेदन्यं वा लेखयेत्, तत्पश्चात् तदनुसारेण नूतनरचनां रचयेदेवं स श्रीमान् निरंतरं शास्त्रपदार्थान् जीवयितुं प्रायतत। तस्य गूर्जरकृतिषु बहुतमरचनानां मूलं कस्मिंश्चित् शास्त्रेऽवश्यं लभ्यत एव।

एकं लघूदाहरणं पश्याम:। षोडशकप्रकरणे पूज्याचार्यश्री हरिभद्रसूरीश्वरजी महाराज: 'परमात्मन: स्तुति: कीदृशेन स्तोत्रेण कुर्यात्' तद्विधानं करोति यद्-

'पिण्डक्रियागुणगतै: स्तोत्रैश्च महामति ग्रथितै:'।

पिण्डो नाम शरीर:, क्रिया नाम शारीरिक चेष्टा, गुणं नाम चान्तरिकविशेषता। एतत्त्रिवर्णनात्मकै: स्तोत्रै: परमात्मा स्तोतव्य:। एतद् वर्णनं पूज्योपाध्यायश्रीमहाराजेन श्री आदिनाथप्रभो: 'जगजीवन जगवालहो' इति स्तवनेऽत्यन्तं सरलशब्दै: समाविष्टम्। द्वितीय-तृतीययो: कण्डिकायां शरीरविशेषता, चतुर्थश्लोके क्रियाविशेषता तथान्तिमश्लोके गुणविशेषता दर्शिताऽस्ति। सामान्य गायको न जानाति-यद् स कीदृश्या: कक्षाया: स्तुतिं करोति।

प्रस्तुतलेखे ईदृगेकविशिष्टरचनाया: परिचय: प्रस्तुतोस्ति। श्री शामलापार्श्वनाथ-प्रभुस्तवनं 'गूर्जरसाहित्यसंग्रह' नामके पुस्तके मुद्रितमस्ति। तत्पूर्वमिदं स्तवनं 'जैनसत्यप्रकाश' नाम्नि पुस्तकेऽपि प्रकटितम्। अस्य स्तवनस्य सप्तदशकाण्डिका: सन्ति।

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्तिनी।

अस्मिन् स्तवने प्रभोः द्रव्यपूजायाः प्रत्येकाङ्गविधौ कीदृग्भावो रक्षितव्यः, तस्य वर्णनमस्ति। अस्य स्तवनस्य रचना पूज्याचार्यश्रीसिद्धसेनसूरिमहाराज रचित ''पूजा चतुर्विंशतिका'' आधारिताऽस्ति। पूजाचतुर्विंशतिका सर्वप्रथमसमये जैनसत्यप्रकाशवर्ष प्र. अङ्क ११ (पत्र-३८९) प्रकटिताऽस्ति। इयमेकाऽप्रकटा कृतिः विद्यते। तस्याः प्राप्तेः इतिहासोऽपि रोमाञ्चकोऽस्ति।

परम पूज्याचार्यदेवश्रीविजयभक्तिसूरीश्वरजीमहाराजशिष्य पं.श्री भुवनविजयजी महाराजः महेसानाग्राम आसीत्। महेसानाग्रामे शाह चिमनलालनगीनदासनाम्नः श्रावकस्य पार्श्वे हस्तलिखितग्रन्थसङ्ग्रहस्य कतिपयानि शेषपत्रकाण्यासन्। पंन्यासजी महाराजस्तानि पत्रकाणि प्रतिश्रय आनाय्यत। तेषां राशिः प्रतिश्रय एककोणे पतित आसीत्। पू. पंन्यासजी महाराजस्तद्राशिगवेषणकार्यं मोहनलालगिरधरलालभोजकं दत्तवान्। भोजकेन तस्मादेकं पत्रकं लब्धम्। सोऽमन्यत यदस्मिन् पत्रके यान्यक्षराणि लिखितानि तानि पूज्योपाध्यायजीमहाराजाऽक्षरैः समानानि सन्ति। संभवति यत् तानि तेषामपि स्युः। तत् शास्त्रस्य नाम 'पूजा चतुर्विंशतिका' आसीत्। तेन तस्य लिप्यन्तरं/संशोधनमकृत/अस्याः लघुकृतेरनुवादः कृतश्च तथा स्वनिरीक्षणैः सहेयं कृतिः जैनसत्यप्रकाशे प्राकाश्यमानीता। एतन्मूलपत्रकं तत्पश्चात् प्रायः पं. प्रभुदासबेचरदासस्य सङ्ग्रहे गतमिति लेखं दृष्ट्वा लगति।

पूजाचतुर्विंशतिकायाः पञ्चविंशतिः श्लोकाः सन्ति। तस्य विषयं जिनपूजायाः द्रव्यक्रिया सह संयुक्तभाव इत्यस्ति। कर्तुः कथनेन द्रव्यभावयोरयं संबन्धः पूर्वाल्लब्धः। (गा.२५) तस्य कर्ता आ.श्री सिद्धसेनसूरिवरो वर्तते। पूर्वसम्पादको मन्यते यत् स सिद्धसेनदिवाकरसूरिः संभाव्यते, किन्तु कृतेः भाषां, विषयं संङ्कलनं च दृष्ट्वा तत् सत्यं न ज्ञायते। कर्ता स्वनामनिर्देशं अन्तिमगाथायां चकार। तस्य गुरुपट्टावल्या अनुसंधानं शेषमस्ति। तत्पश्चात् हि कृतिरचनाकालो निश्चितो भवति। हस्तप्रतस्य पुष्पिकानुसारेणानेन कर्त्रा रचिता द्वितीयाचतुर्विंशिकाऽस्ति। एतत्पूर्वेऽपि तेन रचितैका चतुर्विंशिका स्यादित्यनुमानं कर्तुं शक्यते। सा का भविष्यति? तथा द्वयधिका अन्या चतुर्विंशिकाऽस्ति वा न? अयं प्रश्नोऽनुत्तरोऽस्ति। अस्य प्रश्नस्योत्तरगवेषणे पुष्पिकायाः महत्त्वं सिध्यति। ग्रन्थस्यान्तिमविभागे लिखिता पुष्पिका ग्रन्थकारेण स्वयं लिखिता वा लेखकेन लिखिता वेति संशोधनस्य विषयोऽस्ति यदि ग्रन्थकारेण स्वयमियं पुष्पिका लिखिता भवेत् तर्हि प्रस्तुतकृतिः कर्तुः द्वितीयरचना विद्येत, तन्निःसंदेहं, किन्तु यदि पश्चात् प्रक्षिप्ता भवेत् तर्हि कर्त्रा पूजाचतुर्विंशिकायाः पूर्वे कापि कृती रचिताऽस्ति, तत् कथनं संदेहास्पदं भवेत्। एकक्षणं पुष्पिका अस्मत्समक्षं न भवेत् तर्हीयं कृतिः 'द्वितीया रचना' विद्यते, तस्य प्रमाणं पञ्चविंशत्यां गाथायां 'बीया' शब्दो वर्तत एवं कथयितुं शक्यते, किंतु अन्यया रीत्या

पश्यामस्तर्हि अद्वितीयेत्यर्थे 'बीया' पदमधिकं सङ्गतं ज्ञायते। किञ्च कर्तुः द्वितीया कृतिः न मिलति, ततोऽपीदृशमनुमानं कर्तुमवकाशो मिलति। प्रस्तुतकृतेः हस्तप्रतं मिलेत् तर्ह्ययं प्रश्नोऽधिकः स्पष्टो भवेत्, तस्य च प्रतिलिपिकर्ता पू. उपाध्यायजीमहाराजोऽस्ति वा न तदपि स्पष्टं भवेत् तथा तत्प्रते अशुद्धयो वर्तन्ते, तर्हि तासां परिमार्जनमपि सुकरं भवेत्। अधुना तु पुष्पिकां प्रमाणीकृत्य पूज्य आचार्यश्री सिद्धसेनसूरिमहाराजस्य द्वितीया कृतिः विद्यत एवमेवान्तिमं मन्तव्यम्।

पूर्वसम्पादकेन प्रत्यतीवाऽशुद्धा ज्ञापितास्ति, तस्यार्थो लिपिकर्तृणा प्रभूतेषु स्थानेषु न ज्ञात इत्येव मन्तव्यम्। यदि प्रति पूज्योपाध्यायश्रीमुनिवरेण लिखिता भवेत् तर्हि तस्मिन् संदिग्धस्थानानां संभावना न विद्यते। अस्माकं समीपे जैनसत्यप्रकाशे प्रतिबिंबिता कृतिरस्ति। मूलहस्तप्रतिः नास्ति। ततस्थितानां संदिग्धस्थानानां आंशिकं परिमार्जनं 'शामलापार्श्वनाथप्रभुस्तवनाधारेण कृतमस्ति, तदपि कतिपयस्थानानि संदिग्धान्येव वर्तन्ते। पूज्योपाध्यायजीमहाराजेन पूजाचतुर्विंशिकायाः गूर्जरभाषायां रूपान्तरं कुर्वता कृतेः सर्वपदार्थानां यथातथमनुसरणं न कृतम्। कतिपयाः पदार्थाः गौणाः कृताः, कतिपयाः पदार्थाः कृतौ न सन्ति, तेऽप्युद्धृताः, तथाहि-स्तवने मनसः निश्चलता नैवेद्यपूजा कथिताऽस्ति, शमरतिस्तालः उक्तः, सत्यं घंटनादः कथितः एवं पूजाचतुर्विंशिकायां नास्ति। पूजाचतुर्विंशतिकायाः पञ्चदशमीगाथायाः पश्चात् पूजायाः महिमा विद्यते, पूजायाः फलवर्णनञ्च विद्यते, ततस्तवने न समाविष्टम्।

अस्मिन् लेखे पूजा चतुर्विंशतिकायाः पाठः श्री शामलापार्श्वनाथ प्रभोः स्तवनेन सह सदृशीकृत्य, किञ्चिदंशे संशोध्य च पुनः प्रकटीकृतः। पूर्वसम्पादकः तस्यानुवादमप्यकरोत्, सोऽप्यत्र शुद्धिवृद्धिभ्यां सह प्रकटितः। पूज्योपाध्यायश्रीरचितश्रीशामलापार्श्वनाथप्रभु-स्तवनमपि प्रकटीकृतमस्ति। स्तवने ये पदार्थाः न विद्यन्ते, तेषां निर्देशोऽपि कृतोऽस्ति। पूज्योपाध्यायश्रीमहाराजसाहित्यं प्रति रुचिं धारयताम् विद्वज्जनानां द्रव्यपूजया भावे वृद्धिं चिकीर्षतो भक्तयोगिनो, तुलनात्मकाध्ययनस्य रूचिं चिकीर्षताम् अभ्यासकारिणामियं सामग्री रोचिष्यते, इति विश्वासोऽस्ति।

सम्पादनकर्मणि जिनाज्ञाविरुद्धं द्वयोः ग्रन्थकारयोर्वाशयविरुद्धं किमपि लिखितं, तस्य क्षमां याचावहे।

-यशः शिशू

# खण्ड-३
# दीक्षाशताब्दीभावाञ्जलिः

## समाधिः शरणं मम

- *पंन्यासश्री मोक्षरतिविजयगणिः

### महिमा

श्रमणाचार सर्वस्वं, सार्थक्यं धर्मकर्मणाम्।
मनुष्यजन्मकल्पद्रोः, समाधिः स्तूयते फलम् ।।१।।
समाधिः परमा शान्तिः, समाधिः परमं सुखम्।
समाधिः परमा तृप्तिः, समाधिः कृतकृत्यता ।।२।।
समाधिः परमाह्लादः, समाधिः पूर्णता परा।
समाधिः परमा लब्धिः, समाधिर्ध्येयमग्नता ।।३।।
समाधिः परमानन्दः, समाधि र्दिव्यता परा।
समाधिः परमा सिद्धिः, समाधिः परमो लयः ।।४।।
प्रार्थ्यते प्रार्थनासूत्रे, श्री चतुर्विंशतिस्तवे।
समाधिभावः सततं, श्राद्धैश्च श्रमणोत्तमैः ।।५।।

### स्वरूपम्

चित्तस्य मोक्षमार्गानु-सारित्वं श्रीजिनोदितम्।
प्रशान्तवाहिता गर्भं, समाधिभाव उच्यते ।।६।।
स्पर्शे रसे च गन्धे च, रूपे शब्दे च तुल्यता।
मनोज्ञे वाऽमनोज्ञे वा, समाधिश्चेतसो मता ।।७।।

---

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

मिथ्यात्वस्य प्रशमनं, निर्मलं निश्चलं मनः ।
कषायाणामनुदयः, समाधिः शरणं मम ।।८।।

**साधननिर्देशः सद्गुरुस्तुतिश्च**

अर्हद्वचनश्रद्धानं, गुरुभक्तिरनुत्तरा।
शास्त्रबोधः सर्वाङ्गीण-, श्चारित्रपालनं परम् ।।९।।
सर्वजीवहिताकाङ्क्षा, गुणाभिरतिरुत्तमा ।
प्रतिबोधकुशलता, विमुक्तौ रक्तचित्तता ।।१०।।
कुशाग्रबुद्धिः सर्वत्र, सत्यान्वेषणतत्परा ।
पक्षपातः सदा सम्यक्,-तत्त्वेषु तत्त्ववेदिषु ।।११।।
शंसकेषु ममत्वं न, शत्रुधीर्न विरोधिषु ।
यशस्यपयशस्युच्चैः, समत्वं सुखदुःखयोः ।।१२।।
न रती रमणीयेषु, तदितरेषु नारतिः ।
पुद्गलेषु सदा स्वात्म-भावेषु स्तिमिताशयः ।।१३।।
सीमाप्राप्तैर्गुणैरेतैः, समस्तं येन जीवितम् ।
मृत्युः समाधिसाच्चक्रे, जगच्चैतत् पवित्रितम् ।।१४।।
तस्मै सूरीन्द्राय, श्रीश्रीश्रीविजयरामचन्द्राय।
शमरसतृप्ताय नमः, समाधि सीमामवाप्ताय ।।१५।।आर्या।। युग्मम्।।

# श्रीरामचन्द्रीयमहाकाव्यम्

(चतुर्थः सर्गः)

-*पंन्यासश्री मोक्षरतिविजयगणिः

[1]अथ स्वगुर्वलङ्कृतं, पुरं प्रति द्रुतद्रुतम् ।
व्यहारि सायमेव सं, -यतत्रयेण [2]वर्णिना ।। समानिका ।।१।।

समुज्झ्य संसृतिं पट, -प्रलग्नरेणुकामिव ।
महाव्रते रतः शमी, प्रिये प्रियेव नूतना ।।२।।

अबन्धनद्वयः सदा, -ऽत्रिदण्डशल्यगौरवः ।
त्रिभिः सुदर्शनादिभिः, सुभावितश्च गुप्तिभिः ।।३।।

चतुर्विधोपसर्गतोऽ, परिस्खलद्व्रतोद्यमः ।
चतुष्प्रकारसंज्ञया, विवर्जितात्ममन्दिरः ।।४।।

महाव्रतानि संस्पृशन्, क्रियास्तु पञ्च वर्जयन् ।
त्यजन् प्रमादपञ्चकं, हृषीकपञ्चकं जयन् ।।५।।

शरीरिणश्च षड्विधान्, सुरक्षितुं समुद्यतः ।
बहिस्तदन्यषड्विधैस्, -तपोगुणैरलङ्कृतः ।।६।।

भयाष्टकेन वै मदा, -ष्टकेन मुक्तमानसः ।
जिनागमोदिताम्बिका, -ष्टकेन लालिताङ्गकः ।।७।।

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

१. समानिकाच्छन्दः-ज्-रौ समानिका ग-लौ च वृत्तरत्नाकर-३/१६। २. सममिति गम्यम्।

परित्यजन्नवाप्यसन्,-निदानचिन्तनानि च ।
पठन्नवार्हदागम,-प्रणीततत्त्वमादराद् ॥८॥

दशस्वनादरो दशास्वसंवरेषु सोऽचिराद् ।
बभूव संयमी दश,-प्रकारसाधुधर्मभूः ॥ अष्टभिः कुलकम् ॥ ॥९॥

क्रमेण कच्छपश्चिमं, [1]भृगुं पुरं समाययुः ।
चुचुम्बुरङ्घ्रिमुन्मुदो, गुरुव्रजस्य तत्र ते ॥१०॥

इतश्च पादरास्थितः, कुतश्चनाश्रुणोज्जनः ।
मुनेः पलायनादिमां, व्रतग्रहान्तिमां कथाम् ॥११॥

निशम्य तां कथां क्षणं, बभूव रत्निकाऽम्बिका ।
स्वपुत्रमोहजैनवाग्विचारमिश्रिताशया ॥१२॥

परं क्षणादनन्तरं, विधूय मोहमाङ्गजम्[2] ।
यतिं प्रयातुमुद्यताञ्-जनानुवाच कोपितान् ॥१३॥

यदर्चनीयमादरादिदं वचो ममर्षये ।
यदादृतव्रतं महोद्यमेन पाल्यमन्ततः ॥१५॥

गुरोः कृपां श्रुतज्ञतां, व्रतस्थितिं च साधयन् ।
कदापि मामपि स्मरन्,-निहैत्य तारय प्रभो ॥ (कलापकम्) ॥१६॥

इदं निवेद्य साधवे, नमोविधाय ते जनाः।
विना विधाय विप्लवं, यथागतास्तथा गताः ॥१७॥

स्थलात् ततोऽपि वासरे, द्वितीय एव संयतः ।
वटादिपद्रसंज्ञितां, पुरीं प्रति प्रयातवान् ॥१८॥

गुरोर्गिरेप्सितं पुरं, श्रमार्दितोऽपि सोऽश्रयद्।
**गुरोर्हि शासनं सतां, स्वजीवितादपि प्रियम्** ॥१९॥

---

१. भृगुकच्छसंज्ञम् । २. अङ्गजस्येदमाङ्गजम् ।

कथञ्चिदस्य शोफितौ, पदौ कृतौ निरामयौ ।
श्लथश्रमो गुरूत्तमैः, स योगमप्यवाहयत् ॥२०॥

शतार्धसाधुसन्निधौ स सम्पदाह्वसाधुना ।
समापयद् बृहद्विधि,-र्व्रतस्य रोमहर्षभाग् ॥२१॥

अथैकदा सुधारके,-ति जैनलोकविश्रुतः ।
व्रतीन्दुना विराजिते, पुरेऽत्र सूरिरागतः ॥२२॥

चिकीर्षताथ निर्णयान्[1], परेऽत्र तेन सूरिणा ।
निमन्त्रिता स्वकामित,-प्रपूर्तिकामधुक् सभा ॥२३॥

परन्तु धामधाम[2]धी,-निधिं व्यबुद्ध पूःस्थितम् ।
जिनेशशासनार्पितं, स रामसाधुसिन्धुरम् ॥२४॥

परैव वारयिष्यता, भयं तदुद्भवं तदा।
निमन्त्रणस्य पत्रिका,-स्वलेखि सूरिणा स्फुटम् ॥२५॥

दशाधिकाष्टवत्सरं, वयो हि यस्य सम्भवेत्।
व्रजेत् स एव पर्षदः, प्रवेशयोग्यतामिति ।। युग्मम् ।। ॥२६॥

विलोक्य तां व्रतीशिता, व्यबुद्ध सूरिमानसम् ।
परस्य जानते मनो, विचक्षणाः क्षणादपि ॥२७॥

स्वयोग्यतां विचारयन्, सुधीः स सूरिपर्षदम्।
विनीततागुरुर्गुरू,-त्तमेन सार्द्धमागतः ॥२८॥

अभीक्ष्य तं सभीर्जगौ, स सूरिरागतः कथम्।
भवानिह व्रतिन् व्रतीशिताप्युवाच मङ्क्षु यद् ॥२९॥

भवन्निमन्त्रणाद्यतो,-ऽत्र वर्ष एव दैवतः ।
दशाधिकाष्टहायना, दशा मया समाप्यत ।। युग्मम् ।। ॥३०॥ढ़

---

१. विधवाविवाहादिनिर्णयान् । २. तेजोनिवासः ।

उवाच स स्खलद्वचाः, प्रभाषणं विधास्यति ।
भवान्नवेति धीगुरुं र्गिराननं युयोज सः ।।३१।।

प्रवक्तृभिर्निजं निजं, प्रभाषणं समाप्यते ।
यदा तदा स्वभाषणं, करिष्य एष नान्यथा ।। युग्मम् ।। ।।३२।।

विचार्यमाण उत्तरा,-शयः सुधीपतेर्यतेः।
क्षणेन [1]सूरिणोऽकरोन् मुखं मषीमलीमसम् ।।३३।।

निजान् मनोरथाँस्तदा,-खिलान् खिलान्[2] व्यलोकत ।
विमुह्यमानमानसो, विनिश्चिकाय चेति सः ।।३४।।

अधर्म्यमद्य चेद्ब्रुवे, ध्रुवं विरोत्स्यते तदा ।
नवोऽपि धीधवो यतिः, स धैर्यमन्दरोऽदरः[3] ।। युग्मम् ।। ।।३५।।

अथासिता सभाग्रणीः, प्रभाष्य किञ्चनापरम्।
विना विधाय निर्णयं, सभां समापयद् रयाद् ।।३६।।

कुतो नु हेतुतः सभा,-समापनं बभूव तत्।
अजानतां सभासदा,-मभूदणुर्जनः परम् ।।३७।।

मुनिप्रभावभावितो, महाजनः शनैः शनैः।
स्वामाश्रयं ययावितः, शमीश्वरोऽप्युपाश्रयम्।। युग्मम् ।। ।।३८।।

स्वकीयविद्यमानता,-सुरक्षितार्यसंस्कृतिम्।
तमालिलिङ्गुरागतं, गुरूत्तमाः स्फुरन्मुदः ।।३९।।

क्रमेण सङ्क्रमेण सं,-पुनान उर्वरां गुरुः ।
ग्रहैर्ग्रहेशवन्नभस्-ततः स्थलान्निजानुगैः ।।४०।।

सिनोरसंज्ञकं प्रियं, पुरं महन्न नाणु च ।
श्रितः स वीरसंज्ञको,-[4]ऽभ्रमभ्रमालिका पुनः ।। युग्मम् ।। ।।४१।।

---

१. सूरिशब्द इन्नन्तोऽपि दृश्यते । २. अवरोधितान् । ३. अभयः । ४. अभ्रं नभः ।

अथैकदा समासयत्, स धर्मदेशनाकृते ।
निजप्रशिष्यशिष्यकं, प्रभाविनं नवं मुनिम् ॥४२॥

प्रवेशकस्य निर्वृतौ, महापुरि द्रुतद्रुतम् ।
सुदर्शनस्य[२] सुन्दरं, शमादिपञ्चलक्षणम् ॥४३॥

अधीतजैनवाक्कणो,-ऽप्युपादिशत् तथा यथा।
अमुं सरस्वतीसुतं, विदुर्जनाश्चमत्कृताः ॥ युग्मम् ॥ ॥४४॥

निशृण्वदेतदीयवाक्, तदा गवाक्षसंस्थितः ।
बभूव रोमहर्षणा,-ङ्कितागङ्को गुरुव्रजः ॥४५॥

महाप्रभाविनीं मही,-तलेऽचिरेण भाविनीम्।
जिनेशशासनोन्नतिं, विलोकते स्म पाठकः ॥४६।

विधाय देशनां यदा,-गतः शमी तदन्तिकम्।
तदाविरास तस्य वा,-गियं महामुनेर्मुखाद् ॥४७॥

त्वया भवाम्भसि ब्रुडज्,-जगत्समुद्धरिष्यते ।
यते महाप्रभावको,-ऽद्वितीयको भविष्यसि ॥ युग्मम् ॥ ॥४८॥

अथाद्ययोगकर्मणी, अवाहयद् गुरुर्मुनिम् ।
समर्पितं गुरुः सदा, सुयोग्यमेव मन्यते ॥४९॥

तमेकदाथ पित्तजा, रुजा भृशं व्यबाधत ।
दृढाग्रहाद् गुरोः कथ,-ञ्चिदौषधं च सोऽग्रहीद् ॥५०॥

परन्तु वैद्यदत्ततत्,-कदौषधप्रभावतः ।
ददाह देहमुच्चकैः, सिरास्तथात्रुटन्निव ॥५१॥

द्रुतं च चन्दनादिना, कृतप्रतिक्रिया रुजा ।
किमप्यशाम्यत क्षपा, कथञ्चनापि निर्गता ॥५२॥

---

२. सम्यग्दर्शनस्य ।

प्रगेऽश्विनीसुतोपमः, समागतश्चिकित्सकः ।
चकार कोऽपि निर्गदं, मुनिं दिनेषु केषुचिद् ॥५३॥

परन्तु शाश्वतीव तद्,-दिनात् तदीयविक्रिया ।
बभूव, नोग्ररुग् महो[1]पचर्ययापि शाम्यते ॥५४॥

ततःपरं [2]तपोऽक्षमं, तदीयमिन्द्रियालयम्।
अजायत, प्रजापते-र्मतेर्धिगस्तु वक्रताम् ॥५५॥

क्वचिद्गुरुं[3] क्वचिद्गुरो,-[4]र्गुरुं क्वचित् तु [5]**तद्गुरुम्** ।
क्वचित्सरोजसूरिणं[6], भजन् विनीततानिधिः ॥५६॥

स पञ्च वत्सराणि सं,-यमीशितात्यवाहयत् ।
जिनेश्वरोक्तिकान्तया, सदावियुक्त विग्रहः ॥ युग्मम् ॥ ॥५७॥

मिमील सागरव्रती,-श्वरः[7] कदाचनामुना ।
वटाद्रिपद्रपार्श्वगे, पुरे क्वचिद् मुनीन्दुना ॥५८॥

उदीयमानवक्तृतां, स वक्तृतापतिर्यतिम् ।
विलोक्य मोदतेतरा,-मिवाम्बुदं शिखावलः ॥५९॥

इमं मुनिं स्वशैक्षकं, मनोहराभिधं च सः ।
समासयद् व्रतीश्वरः, कुतूहलेन पर्षदम् ॥६०॥

क्रमेण धर्मदेशनां, त्रयोऽपि ते समादिशन् ।
निपीय तां स सागर,-व्रतीश्वरः शमन्वभूत् ॥६१॥

मुनिं तु रामनामकं, विशेषतस्तमस्तवीत् ।
यदेष धुर्यतां ध्रुवं, धरिष्यति प्रवतृषु ॥६२॥

ततः परं यतेरतः, प्रभाषणात् प्रभावितः ।
यदा यदामिलन्मुनिं, तदा तदाभ्यभाषयद् ॥६३॥

१. उपचर्या चिकित्सा । २. द्वादशविधं तपः प्रोक्तमत्र तु अनशनं नाम प्रथमं तपो बोध्यम्। ३. प्रेमविजयम्। ४. दानविजयम्। ५. महोपाध्याय-श्रीवीरविजयम्। ६. कमलसूरीश्वरम् । १. आनन्दसागरसूरीश्वरः।

मुनिं विभिन्नपण्डिता:, क्रमादथाध्यजीगपन् ।
स्वमस्य मेनिरे समे, -ऽपि केवलं हि साक्षिणम् ॥६४॥

अथैकदाभिपाठयन्,-मुनिं बुधोऽप्यबुद्धवद् ।
विना विचार्य सुनृता,-नृतं विना प्रयोजनम् ॥६५॥

विभान्ति तावदेव ते, मदान्धशास्त्रसिन्धुरा: ।
न यावदेति वेदसं,-ज्ञसिंह इत्यवग्द्विज:॥ युग्मम् ॥ ॥६६॥

दृढोत्तरेण तं प्रति,-प्रवक्ति स स्म वित्प्रभु: ।
उपेक्षते मुनि: कथं, जिनागमावमाननम् ॥६७॥

करोति वेदकेसरी, स तावदेव गर्जना: ।
न यावता पदं धरेज्,-जिनेश्वरागमाष्टपाद् ॥६८॥

अत:परं मम त्वया, न कार्यमस्ति किंचन ।
**अनेन भर्मणापि[1] किं, यतो हि कर्णकर्तनम्** ॥६९॥

इदं निगद्य वेदसं,-स्थितास्त्रुटीरदर्शयद् ।
त्रिकोटिशुद्धभर्मणा[2], जिनोक्तितुल्यतां च स:॥विशेषकम्॥ ॥७०॥

वितीर्य वेतनं तत:, स गेहिभिर्विसर्जित: ।
व्रतीन्दुसत्त्ववैदुषी,-चमत्कृतोऽग्रजोऽव्रजत् ॥७१॥

अथानुयोगसंज्ञका[3],-गमं दिनेषु विंशतौ ।
समध्यगीष्ट धीगुरु:, स सूत्रतस्तथार्थत: ॥७२॥

ऋतुद्वयं च पाठयन्, कदापि पाठकप्रभु: ।
जिनागमान् मुनिं मुदा,-शिषानयाभ्यनन्दयद् ॥७३॥

अत: परं समेषु ते, जिनागमेषु सर्वदा ।
मतिर्गमिष्यति व्रतिञ्,-जगत्सु वज्रिवज्रवत्॥युग्मम्॥ ॥७४॥

१. आनन्दसागरसूरीश्वर: २. स्वर्णेन । ३. अनुयोगद्वारम् ।

निसर्गजन्म तन्महो,ऽथ विद्यया व्यवर्ध्यत ।
कुमुद्वतीपतिद्युति[१],-र्हृदीशयेव राकया[२] ॥७५॥

पुनान उर्वरां वरा,-ङ्घ्रिणा गुरोः कुलं श्रितः।
समाधिसाम्यमाप सं,-यमीश्वरः श्रुतोदितम् ॥७६॥

विशुद्धमानसो घना,-त्ययाम्बुवच्च[३] कम्बुवत्।
निरञ्जनश्च जीववत्, सदास्खलद्गतागतिः ॥७७॥

गतावलम्बनो वियद्-वदर्कवत् प्रबोधकृत् ।
द्रुवत् परोपकृत् सदै,-ककश्च खड्गिशृङ्गवत् ॥७८॥

प्रमादमुक् सदैकभू,-र्धनद्विजीवपक्षिवद्[४] ।
अबन्धनः समीरवच्,-शशाङ्कवच्च सौम्यगुः ॥७९॥

दिवानिशं च कूर्मवत्, सुगोपितेन्द्रियः स्वयम् ।
करीन्द्रवत् पराक्रमी, बली च सौरभेयवत् ॥८०॥

अधृष्यतां मृगेन्द्रवन्,-[५]नगेन्द्रवच्च धीरताम् ।
विमुक्ततां च [६]वीन्द्रवन्,-[७]नदीन्द्रवद् गभीरताम् ॥८१॥

कुवत्[८] क्षमामलेपतां, सहस्रपत्रपत्रवत् ।
सुजातरूपवच्च स, श्रितः सुजातरूपताम् ।। सप्तभिः कुलकम् ॥८२॥

शमाम्बुवाहैः परिसिञ्चतामुना, महाव्रतारामम‍ृषीश्वरेण ।
न केवलं सद्गुणशस्यपुञ्जः, परन्तु दोषातपशान्तिरापि ।।उपजातिः॥८३॥

---

१. चन्द्रप्रभा । २. पूर्णिमया । ३. शरत्। ४. भारूण्डपक्षिवद् । ५. मेरुगिरिवत्। ६. गरुडवत् । ७. समुद्रवद् । ८. क्षितिवत् ।

भोगे रोगे तरुणिमनि वा वृद्धतायामथो वा,
सर्पे पुष्पे दृषदि कनके पत्तने वा वने वा ।
शत्रौ मित्रे मृगदृशि कुशे निर्विशेषाक्षिकोऽपि,
सैकः सीमाभवदुपशमस्वो विशेषज्ञतायाः ।। (मन्दाक्रान्ता) ।।८४।।

रक्षं रक्षं वचनवपुषी मानसं चापि गुप्तौ,
रोधं रोधं करणकरिणः संयमालानबन्धे।
बन्धं बन्धं यमनियमयोः पाशयोः स्वं सदैवं,
चित्रं रामः स्पृहयति यतिक्ष्मा-पतिर्मोक्षलक्ष्मीम् ।। मन्दाक्रान्ता ।।८५।।

समेक्षणः स्मेरसरोजचक्षुषा, विमुक्तपार्श्वोऽककुबम्बरोऽभवः।
तथापि चित्रं सशिवः स्मरान्तको, महाव्रतीशो गुरुदेवता मुनिः[१]।।वंशस्थम्।। ८६।।

विरतोऽपि निर्वृतिरतो, वरेण्यदाताप्यकिञ्चनः प्रवरः।
योग्यप्ययोगितेच्छुः, शमिनश्चित्रं चरित्रमिदम् ।।आर्या।।८७।।

ध्येयो नृणां ध्यानलीनोऽपि नैवा,-दत्तेऽदत्तं चित्तहारी तथापि ।
मुक्तोऽत्यन्तं मैथुनादप्यृषीश,-श्चित्रं मुक्तिप्रेयसीप्रेममग्नः ।।शालिनी।।८८।।

जिनाज्ञां सदैवात्मनीनामदीनः, स आसेवमानोऽनिशं सौख्यलीनः।
जिनाधीशवाणीसुधापानपीनो,-[२]ऽणुबन्धोऽभवच्चित्रमेतन्मुनीनः।।भुजङ्गप्रयातम्।।८९।।

आदित्यः परितापयत्यसुमतो यात्यस्तमप्यन्वहं,
पीयूषांशुरपुष्कलांसुरनिशं दोषाकरः क्षीयते।
विध्याति श्वसनेन[३] मन्दिरमणिः[४] कृष्णैकवर्त्मा शिखी,
तस्योन्मूलयतस्तमस्तदभवत् कश्चिन्न तुल्यः प्रभोः ।। शार्दूल०।।९०।।

इति श्रीरामचन्द्रीयमहाकाव्ये श्रीजिनशासनभासनभासक-मोहान्धकारविनाशक-भव्यजनकमल-वनविकाशक-पूज्यपादाचार्यदेव-श्रीमद्विजय-रामचन्द्रसूरीश्वर-चरितवर्णनात्मके चतुर्थः सर्गः ।।

१. समदृष्टिः पक्षे न विषमेक्षणः, ललनया विमुक्तपार्श्वः, अककुबम्बरः = श्वेताम्बरः पक्षे दिगम्बरान्यः = शङ्करान्यः, अभवः = अल्पसंसारः पक्षे भवान्यः कोऽपि भूत्वापि स मुनिः, महाव्रती, ईशः, गुरुदेवता = महादेवः, सशिव=शिवासहितः पक्षे सकल्याणः, स्मरान्तको बभूव तच्चित्रमिति भावः।। २. बन्धः = संसारः शरीरं चेत्यनेकार्थः । ३. पवनेन । ४. दीपः ।

# सूरिरामवचनामृतम्

- *मुनिश्रीप्रशमरतिविजयः

धर्मः सौख्यकरः किन्तु, सौख्यरागहरोऽप्यसौ ।
तेन धर्मो मनुष्याणां, परमानन्ददायकः ।।५१।।

दुर्लभं प्राप्य मानुष्यं, धर्माद् दूरे भवन्ति ये ।
तेषां कथं पुनर्लभ्यो, धर्म आगामिजन्मनि ।।५२।।

सुखासक्ति-र्दुःखभीति, र्धृता जीवैः पुनः पुनः ।
धर्मराग आत्मचिन्ता, धार्यतामधुनैकदा ।।५३।।

पापानि सन्ति यानीह, ये दोषा ये च दुर्गुणाः ।
आत्मन्यमी समुत्पन्नाः, सौख्यरागेण केवलम् ।।५४।।

पापाचाररताः कुर्युः, दुष्कार्याणां शतान्यपि ।
त्यक्त्वा लज्जां कुलाचारं, पशवन्ति सुखैषिण : ।।५५।।

आत्मनश्च परेषां च, दोषा हानिप्रदाः खलु ।
दोषैरपयशो भूरि, दोषैर्दौर्गत्यभाग् भवेत् ।।५६।।

दुर्गुणैरशुभैर्येन, सद्गुणा नाशिताः शुभाः।
दुर्गतिर्निश्चिता तेन, सद्गतिश्च विलोपिता ।।५७।।

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

दुर्गुणानाञ्च दोषाणां, पापानाञ्चकलङ्किता ।
सुखेच्छाबद्धचितानां, तथारुपा न भासते ॥५८॥

मोहराजमहासैन्ये, स्थिता रागादिका भटाः ।
संतापं जनयन्त्येव, धर्ममार्गस्थितानपि ॥५९॥

मोहस्याभिभवं कुर्वन्, स्वात्मारामसुखेच्छुकः ।
रागद्वेषौ निबघ्नीयाद्, दासवत् स्वाङ्कुशं गतौ ॥६०॥

ग्रन्थिदेशस्थितः शुद्धं, यथाप्रवृत्तमाश्रितः ।
अपूर्वकरणाद् हन्याद्, रागद्वेषानुबन्धिकाम् ॥६१॥

सम्यक्त्वं लभ्यतेऽनर्ध्यं, जित्वा दर्शनसप्तकम् ।
तस्मादाविर्भवत्येको, विचारो मोक्षकेन्द्रितः ॥६२॥

त्यक्तव्यः खलु संसारो, ग्राह्यं संयमजीवनम् ।
प्रापणीयश्च मोक्षोऽस्ति, त्रिपदीयं सनातनी ॥६३॥

रोगोऽस्ति कर्मसंयोगो, विकारो देहसङ्गतिः ।
वेदना जायते जीवे, मोक्षस्तु स्वास्थ्यमुत्तमम् ॥६४॥

जीवः करोति निस्तन्द्रं, प्रयत्नं स्वार्थसाधने ।
तदर्धपुरुषार्थेन, मोक्षो हस्तंगतो भवेत् ॥६५॥

अहो अज्ञानवैचित्र्यं, दुःखसन्तानदायके ।
संसारे सर्वजीवाना-मादरः कश्चिदुत्कटः ॥६६॥

सम्यक्त्वं रागभावस्य, द्वेषभावस्य मान्द्यकृत्।
श्रद्धाप्रकर्षतो दद्यात्-परमां शान्तिमात्मनः ॥६७॥

सम्यक्त्वमेव संसारे, पीयूषं तापहारकम्।
मूर्छापसारकं सत्त्व-धारकं पापवारकम् ॥६८॥

संसारावासनिर्वेदः, पापमात्रानुतापनम्।
मनोरथाश्च धर्मस्य, देवगुर्वोर्महादरः ॥६९॥

जिनाज्ञापारवश्यञ्च, विधेरेकान्तमाग्रहः ।
प्ररूपणाः स्फुरत्सत्या, आचारः शास्त्रवर्णितः ॥७०॥

लक्ष्यवेधः साधनाया, नित्यमावश्यिकी क्रिया ।
भवभ्रमणभीरुत्वं, निर्वाणस्मरणं सदा ॥७१॥

स्वाध्यायो ग्रन्थरत्नानां, सौख्येषूद्वेगचिन्तनम् ।
साम्यावलम्बनं दुःखे, प्रव्रज्याग्रहणेच्छिता ॥७२॥

चेतसो निग्रहे यत्नः, कर्मनिर्जरणे मतिः।
आत्मचिन्तारतिश्चैते, सम्यक्त्वेनागता गुणाः ॥७३॥

प्रशमं चाथ संवेगं, वैराग्यं सम्यगाश्रितः ।
आस्तिक्यं करुणां चैव, सम्यक्त्वं भावयेत् सुधीः ॥७४॥

रागं दधाति धर्मात्मा, गुणेषु गुणवत्स्वपि ।
दोषे द्वेषं परं दोषि-जनेषु करुणाभरम् ॥७५॥

जिनाज्ञा परमो धर्मो, जिनाज्ञा परमा क्रिया ।
जिनाज्ञा यत्र नास्त्यत्र, न स धर्मो न सा क्रिया ॥७६॥

संसारे भौतिकं सौख्यं, यत्किञ्चिद् दृश्यतेऽत्र तत् ।
दुःखैरस्त्यविनाभावि, तेन सौख्यं हि दुःखकृत् ॥७७॥

दुःखं पार्थिवमायाति, यत् तत् कर्मापहारकम् ।
तन्नाशाय न कर्तव्यं, पापं कर्मानुबन्धकम् ॥७८॥

धर्मो न सौख्यलाभाय, कार्यो निर्वाणदायकः ।
रूप्यकाणि न याच्यन्ते, कदाचित् कोटिदायिनः ॥७९॥

यो हि भौतिकसौख्यार्थं, धर्मप्रवृत्तिमाचरेत् ।
कुर्यादयं स्वहस्तेन, नूनं दौर्गत्यसर्जनम् ॥८०॥

न तृप्ता नैव तृप्यन्ते, सौख्यभोगेन जन्तवः ।
विनिर्वृत्तसुखाकांक्षास्-तृप्तिं यान्ति परां जनाः ॥८१॥

मानवीयो भवो मुग्धैः, कर्मबन्धैः कलुष्यते ।
विधीयते ह्यकर्तव्यं, कर्तव्यं न विधीयते ॥८२॥

राजानो धनवन्तश्च, मृता मुक्त्वाऽत्र सम्पदः ।
तथापि लक्ष्मीवाञ्छाभि-र्विश्वमेतन्न मुच्यते ॥८३॥

अन्नपानादिसंमोदै, र्मन्वानः सुखितां निजाम् ।
वासनायाः पारवश्यं, नालं द्रष्टुं किलाऽऽत्मनः ॥८४॥

परिग्रहारम्भबद्धा, महत्त्वं लोकसाक्षिकम् ।
अर्जयन्तो महामूढा, बध्यन्ते नरकायुषा ॥८५॥

दान-शील-तपो-भावै, र्धर्मचर्यापरायणाः ।
यान्ति सम्यक्त्वसंयोगाद्, गृहस्था अपि सद्गतिम् ॥८६॥

संसारस्य परित्यागः, कर्तव्यस्तत्त्वचिन्तकैः ।
दीक्षैव समुपादेया, परमार्थावलम्बिनी ॥८७॥

दीक्षापालनसामर्थ्या-भावो दोषो महान् न हि ।
दीक्षाग्रहणवाञ्छाया, अभावो दूषणं महत् ॥८८॥

ये ये तीर्थंकरा जाता, जायन्ते भाविनस्तथा ।
सर्वेऽप्येते परिव्रज्या-पालनैरेव तारकाः ॥८९॥

अष्टवर्षवयस्येव, दीक्षा ग्राह्या नरोत्तमैः ।
अस्मिन् काले व्यतिक्रान्ते, विलम्बकारिता मता ॥९०॥

दीक्षा यैरादृता तेषां, जीवितं सफलं भवेत् ।
दीक्षाऽऽत्मनो महानन्द-कारिणी पारमेश्वरी ।।९१।।

दीक्षाधर्मोऽपि नापात्रे, योजनीयः कदाचन ।
वनराजप्रियादुग्धं, मृत्पात्रे स्थाप्यते कथम् ।।९२।।

योग्यता प्रथमं साध्याऽऽराधनारसिकैरपि ।
क्रमादेव भवेल्लाभो, हानिरेव क्रमात्यये ।।९३।।

मार्गानुसारिता तत्र, धर्मस्य प्रथमं पदम् ।
पञ्चत्रिंशद्गुणैरत्र, स्वभावः साध्यते शुभः ।।९४।।

सम्यग्दर्शनलाभेन, शमादीनां समुद्भवः ।
धर्मस्य परमार्थस्य, द्वितीयं मङ्गलं पदम् ।।९५।।

अर्हद्धर्मैकनिष्ठाना-मेकविंशतिसद्गुणाः ।
प्रशस्ताः पुण्यवन्तश्च, धर्मस्याग्रेतनं पदम् ।।९६।।

भावश्रावकधर्मस्य, गुणाः सप्ताधिका दश ।
द्वादशव्रतसंयुक्ताः, पदं तावच्चतुर्थकम् ।।९७।।

यथाशक्ति प्रयुज्यन्ते, श्राद्धस्य प्रतिमा अपि ।
क्रमोऽयं भगवद्दीक्षा-ग्रहणस्य निरामयः ।।९८।।

येनाऽऽदत्ता गुरोः पार्श्वे, दीक्षा पञ्चमहाव्रतैः ।
तेनाप्यध्यासनीयास्ता, भावनाः पञ्चविंशतिः ।।९९।।

विजेतव्यः प्रमादारिर्गर्वो नाश्योऽसुखङ्करः ।
ज्ञानमभ्यधिकं साध्यं, गुरुः सेव्यश्च देववत् ।।१००।।

भेतव्यं परसंयोगाद्, आत्मा ध्येयो निरञ्जनः ।
उपयोगः शुभोपाये, स्थापनीयो निरन्तरम् ।।१०१।।

मानाऽपमानयो: साम्यं, लाभेऽलाभे च तुल्यता ।
सुखे दु:खे समाधिश्च, साधोरेतत् सुलक्षणम् ॥१०२॥

तीर्थकृद्वचनैरेव, वक्तव्यं सूक्ष्मबुद्धिभि: ।
भगवद्भाषितैरेव, जीवितव्यं प्रतिक्षणम् ॥१०३॥

लोकसंज्ञापरित्याग:, कर्तव्य: सिंहपौरुषै: ।
लोकार्थं जीवनं नास्ति, शासनायास्ति जीवनम् ॥१०४॥

सत्यं ध्येयं च गेयं च, रक्षणीयं च सात्त्विकै: ।
सत्ययोगे हि धर्मोऽस्ति, हते सत्ये हता वयम् ॥१०५॥

भूयानेकान्तवासोऽस्तु सत्यधर्मपरायण: ।
न चाऽसत्यसमायोगाल्-लक्षलोकैर्महोत्सव: ॥१०६॥

येन मार्गेण लभ्येत मोक्ष आगामुके भवे ।
तेन मार्गेण गन्तव्यं सर्वज्ञानामिदं मतम् ॥१०७॥

आत्मान: परमानन्दं, प्राप्नुवन्तु भवक्षयात् ।
एका **शुभाभिलाषा**ऽस्ति, सेयं सर्वसुखावहा ॥१०८॥

# खण्ड-४
# अर्वाचीनकृतयः

## गुणाधिराजः

-*आचार्यश्री कल्याणबोधिसूरिः

(इह हि सर्वेष्वपि गुणेषु कृतज्ञतैव श्रेष्ठतमेति प्रतिभाति प्रतिभापूतानाम्। तदत्र गुणाधिराजकल्पे गुणे मनाङ्-मीमांसामहे पद्यबन्धेन।)

सहस्रेष्वपि दुष्प्राप, उपकारकरो नरः।
उपकृतं तु जानाति, स लक्षेष्वपि दुर्लभः ॥१॥

मुधा बुधास्तु मुह्यन्ति, ह्युत्तमाधमचिन्तने ।
[1]कृतघ्नान्नाधमो विश्वे, कृतज्ञान्नान्य उत्तमः ॥२॥

प्राप्य भोजनमात्रं यो, दर्शयति कृतज्ञताम्।
तेन शुनाऽपि नैवेति, कृतघ्नः खलु तुल्यताम् ॥३॥

अकृतज्ञा असङ्ख्याताः, सङ्ख्याताः कृतवेदिनः ।
कृतोपकारिणः स्वल्पा, द्वित्राः स्वेनोपकारिणः ॥४॥

कृतघ्नता महादोषो, महागुणः कृतज्ञता।
श्रूयतेऽतो हि शास्त्रेषु, त्विदं वसुन्धरावचः ॥५॥

---

* पू.आचार्यदेवेशश्रीमद्विजयभूवनभानुसूरि साम्राज्यवर्त्ती।
१. कृतघ्नः यः परेण कृतमुपकारं विस्मरति, तस्मिन्नेव वाऽपकुरुते।

न हि मे पर्वता भारा, न मे भाराश्च सागराः ।
कृतघ्नाश्च महाभारा, भारा विश्वासघातकाः ।।६।।

अल्पमप्युपकारं यो, महान्तमेव मन्यते ।
महात्मा स नमस्तस्मै, यः कृतज्ञशिरोमणिः ।।७।।

गुणाधिराजसेवायां, तदस्यां यत्यतां बुधैः।
एवमेव बुधत्वं स्यात्, **कल्याण**श्चैवमेव हि ।।८।।

# आगमस्यामृतम्

-*आचार्यश्री कल्याणबोधिसूरिः

परमकारुणिकस्य परमात्मनः श्रीमहावीरस्वामिनो या वाणी साऽऽगमत्वेन प्रसिद्धा। केवलज्ञानाऽऽलोकेनाऽऽलोकितजगत्तत्त्वस्यास्य भगवतो वचनमद्यापि विश्वविदुषां चित्तं हरति। किल देवा अमृतं पिबन्तीति प्रवादः। तथापि तेऽपि यान्त्येव मृत्योर्गोचरत्वम्। एवञ्चाभिधानमात्रम्-अमृतमिति, अमरा इति च। परमार्थतोऽमृतं तु तदेव, यत्पानेन रागद्वेषादिविभावविहानानुभावात् स्वभावप्रतिष्ठानं स्यात् तथा च जन्मजरामृत्यु-प्रभृत्यपायानामात्यन्तिकक्षयात् मुक्तिपदं लभ्यते। अतस्तत्त्वत आगम एवामृतम्, तत एव तत्फलसिद्धेः, यत्किञ्चिद्बाह्यद्रव्यस्य तदहेतुत्वाच्च, अन्वाह-

पीतामृतेष्वपि सुरेन्द्रपुरःसरेषु, मृत्युः स्वतन्त्रसुखदुर्ललितः सुरेषु ।
वाक्यामृतं तव पुनर्विधिनोपयुज्य, शूराभिमानमवशस्य पिबन्ति [1]मृत्योः ।।

तदिदमास्वादमधुरमायतिहितममृतं नैकाकिनैवनिपेयम्, अपि तु जगतेऽपि देयमिति विचिन्त्यात्र प्रस्तूयन्ते केचनाऽऽगमामृतबिन्दवः

।। भूएहिं जाणे पडिलेह सायं।।

(प्रथमागमस्वरूपं श्रीआचाराङ्गसूत्रम्)

सातं सुखमुच्यते। सुखमेव प्रियं सर्वेषामपि जीवानाम्।
आत्मन्यध्यक्षसिद्धमेतत्, आत्मत्वं हि समानं परेष्वपि जीवेषु।।

अतो यतनीयं परपीडापरिहारे, आह च **श्रीव्यासमहर्षिः** पुराणेषु, अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।

---

* पू.आचार्यदेवेशश्रीमद्विजयभुवनभानुसूरिसाम्राज्यवर्त्ती।

१. वसन्ततिलका वृत्तम्-सिद्धसेनीद्वात्रिंशिकायाम्।

"परोपकारः पुण्याय, पापाय परपीडनम्"।। एवमेवोपपद्यत उपनिषदुपदिष्टा सर्वभूतात्मभूतताऽपि, परपीडालेशसद्भावेऽपि तदसङ्गतेरिति भावनीयम्। अत एव निरूपयन्ति तत्त्वज्ञाः।

मातृवत् परदारेषु, परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु, यः पश्यति, स पश्यति ।।१।।

अतः परमसाम्यमवलम्ब्य जीवमात्रे करणीयं निजात्मावलोकनम्, एवमेव चक्षुष्मत्तोपपत्तेरिति शम्।

# तृतीयाविभक्तिसन्दृब्ध-श्रीचारित्रसप्तविंशिका-६

- *मुनिश्री सम्यग्दर्शनविजयगणिः

(स्रग्धरा)

ऐन्दैः स्तुत्यं जिनेशं, सुभगपदकजं, पुण्यप्राग्भारपूतम् ।
विघ्नालीविप्रमुक्तं, भवगदरहितं, शुद्धसद्भावयुक्तम्।।
नाथं तं पार्श्वनाथं, प्रमुदितमनसा, प्रीतिभक्त्यार्द्रभावः ।
वन्दित्वा प्रार्थयेऽरं, मम भवविरहं, देहि देवाधिदेव ! ।।१।।

(श्रीवृत्तम्-ऽ।।ऽऽ,।।।ऽऽ)

यच्चरणेन स्थगितविभावै-, र्भव्यजनोऽधान्निजगुणपुञ्जम्।
दोषविकारा अपि च विजितास्तच्चरणेनाप्नुहि सुखमात्मन्! ।।२।।

यच्चरणेन श्लथितविमोहः, सौख्यप्रदाप्तो भवति शिवाध्वा।
पावनपुण्यं प्रथितममूल्यं, तच्चरणेनाऽऽप्नुहि सुखमात्मन् ! ।।३।।

यच्चरणेनाऽऽगमबहुभेदं, ज्ञातमविद्या द्रुतमपयाता।
शासनप्रीतिश्च विकसिताऽऽशु, तच्चरणेनाऽऽप्नुहि सुखमात्मन् ! ।।४।।

यच्चरणेन स्थिरशुभभावः, प्राणिगणः सत्परिणतिकान्ताम् ।
स्फारगुणामुद्वहति सुरक्तां, तच्चरणेनाऽऽप्नुहि सुखमात्मन्! ।।५।।

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।
१. भ-त-न-ग-ग छंदोनु.सू. २.१३२।

यच्चरणेनाऽऽपरमसुखं शं, प्राप्तमपास्ता मम भवभीतिः।
श्री शिवलक्ष्मीर्मयि बहुप्रीता, तच्चरणेनाऽऽप्नुहि सुखमात्मन्! ।।६।।

(मन्दाक्रान्ता)

चारित्रेण त्यजति भविकः, दुःखदौर्गत्यभारम्।
चारित्रेणाऽऽश्रयति समतां, सर्वसौख्यप्रदात्रीम्।।
चारित्रेणाऽऽरचति सुगुणां, ध्यानपुष्पाढ्यमालाम्।
चारित्रेणाऽतुलसुखप्रदे, तिष्ठ निःश्रेयसे भोः ।।७।।

चारित्रेणाऽऽसदति सुजनो ज्ञानरत्नैकसारम्।
चारित्रेणाऽऽकलयति सदा, हेयज्ञेयादिभावान्।।
चारित्रेण स्फुरति हृदये, स्वात्मसौख्यैकलक्ष्यम्।
चारित्रेणाऽतुलसुखप्रदे, तिष्ठ निःश्रेयसे भोः ।।८।।

चारित्रेण क्षरति सहसा, कर्मधूलीसमूहः।
चारित्रेण व्रजति समतां, ध्यानतः शुद्धिपात्रात्।।
चारित्रेण ज्वलति सकलं, मोहभूपालसद्मम्।
चारित्रेणाऽतुलसुखप्रदे, तिष्ठ निःश्रेयसे भोः ।।९।।

चारित्रेण प्रभवति रमा, साम्यलावण्यपूता।
चारित्रेणाऽर्जति गुणमणीन्, सत्कलौघप्रभाढ्यान्।।
चारित्रेण स्खलति निखिलं, मोहसैन्यं बलीष्ठं।
चारित्रेणाऽतुलसुखप्रदे, तिष्ठ निःश्रेयसे भोः ।।१०।।

चारित्रेण स्खलति न कदा धर्मलाभः [१]शुभायः।
चारित्रेण प्रसरति जनेऽध्यात्मसद्गन्धसारः।।
चारित्रेणाऽऽपतति सकला, सज्जनानन्ददा श्रीः।
चारित्रेणाऽतुलसुखप्रदे, तिष्ठ निःश्रेयसे भोः ।।११।।

---

१. शुभः आयः – लाभः येन स इति विग्रहः।

(वसन्ततिलका)

क्लिष्टाष्टकर्मदलनात्, गतपातकेन,
मोहाब्धिपारकरणात्, वरपोतकेन।।
मिथ्यात्वभावहननात्, गुणनिर्मलेन,
सौहार्दमस्तु सततं, चरणेन तेन ।।१२।।

रुद्धं कुमार्गगमनं चरणेन येन,
सन्मार्गयानमनघं सफलं प्रवृत्तं ।।
सद्भावसौरभमयं सकलश्च भूतं,
सौहार्दमस्तु सततं चरणेन तेन ।।१३।।

सत्यं क्षमाऽऽर्जव तपांसि विनम्रता च,
सम्भोगवर्जनविमुक्तिव्रतानि शौचम्।।
निर्लोभताऽस्ति सुलभा चरणेन येन;
सौहार्दमस्तु सततं चरणेन तेन ।।१४।।

सम्यक् कलाऽऽशु कलिता सकला विशाला,
लब्धः सुदर्शनगुणः प्रशमश्च पुष्टः।।
सर्वं शुभं सुखकरं चरणेन येन,
सौहार्दमस्तु सततं चरणेन तेन ।।१५।।

श्रेयःपथे रथसमेन श्रमो नराणां,
ध्वस्तो महोदयपदं परिप्रापितश्च ।
तीर्णो भवाम्बुधिरहो! चरणेन येन,
सौहार्दमस्तु सततं चरणेन तेन ।।१६।।

(मालिनी)

मदनमदविनाशः संयमेनैव भूयात्,
परमसुखविकाशः संयमेनैव भूयात्।
प्रचुरदुरितनाशः संयमेनैव भूयात्।
चरणविचरणेनाऽऽत्मन्! लभस्व स्वसौख्यम् ।।१७।।

सकलसुगुणवासः, संयमेनाप्यतेऽहो!
विधुसमविमलं हृद्, संयमेनाप्यतेऽहो!
प्रशमरुचिप्रकाशः, संयमेनाप्यतेऽहो!
चरणविचरणेनाऽऽत्मन्! लभस्व स्वसौख्यम् ॥१८॥

विशदहृदयगुप्तिः धार्यते संयमेन,
मधुरवचनगुप्तिः धार्यते संयमेन,
रुचिरकरणगुप्तिः धार्यते संयमेन,
चरणविचरणेनाऽऽत्मन्! लभस्व स्वसौख्यम् ॥१९॥

कमलसुरभिवृत्तिः, संयमेनाऽस्तु नित्यं,
जिनप्रवचनभक्तिः, संयमेनाऽस्तु नित्यं,
जिनवरगुणरक्तिः, संयमेनाऽस्तु नित्यं,
चरणविचरणेनाऽऽत्मन्! लभस्व स्वसौख्यम् ॥२०॥

भवभ्रमणविमुक्तिः, संयमेनाऽस्तु शीघ्रं,
विषमभवविरक्तिः, संयमेनाऽस्तु शीघ्रं,
[१]वृजिनविसरमुक्तिः, संयमेनाऽस्तु शीघ्रं,
चरणविचरणेनाऽऽत्मन्! लभस्व स्वसौख्यम् ॥२१॥

(अनुष्टुप् :-)

येनाखिलं गतं पापं, दुर्भावो निहतो द्रुतम्।
सद्भावसौष्ठवं दत्तं, चारित्रेण शुभं भवेत् ॥२२॥

येन दुष्कर्म नष्टं स्यात्, सत्कर्म समुपार्ज्यते।
नित्यं संनिहितं सौख्यम्, चारित्रेण शुभं भवेत् ॥२३॥

येन कष्टकरं कार्यम्, सुसाध्यं सहसा भवेत्।
कष्टं ध्वस्तञ्च येन स्यात्, चारित्रेण शुभं भवेत् ॥२४॥

१. पापम्

स्वर्ग: शिवं सुखं श्रेय:, दु:खं न दुर्गति: कदा।
साम्यं शान्तिश्च येन स्यात्, चारित्रेण शुभं भवेत् ।।२५।।

दौर्भाग्यं दीनता दोष:, दारिद्र्यं जडता गता,
ध्वस्तो मोहरिपुर्येन, चारित्रेण शुभं भवेत् ।।२६।।

(शिखरिणी -)

स्मृतं चारित्रं यद्, प्रवरसुखदं दु:खशमकम्।
नुतं चारित्रं यद्, रुचिरसमताभावमलते[१]।
धृतं चारित्रं यद्, कृषति[२] गुणसम्पत्तिमसमाम्,
तत: **श्रेय:** संपद्, भवति परमा **दर्शन**करी ।।२७।।

१=विभूषित करे छे, २=वश करे छे।

# काव्यशास्त्रविनोदेन...

- *श्रीकमलः

लज्जागुणो भवेत् कासां?, प्रशस्यं किं भवेत् सताम्? ।
किं भवेत् देहशोभायै?, **स्त्रीणां शीलं विभूषणम्** ॥१॥

कः प्राप्नोति गतिं मुक्तिं?, कस्य ज्ञानादिसद्गुणाः? ।
प्राणिनां किं भवेद् वारि?, **जीवो जीवस्य जीवनम्** ॥२॥

किमर्घ्यं गुरवे शिष्यैः?, कस्मिन् सति भवेत् शुभम् ।
बिम्बं पूज्यश्च कीदृशम्?, **सर्वं सत्त्वे प्रतिष्ठितम्** ॥३॥

कः सखा परलोके स्यात्?, केनाऽऽप्यते जयं सदा ।
दीयमानं धनं कीदृग्?, **धर्मः सत्येन वर्धते** ॥४॥

[1]कदर्यस्य वचः किं स्यात्?, कार्यः सर्वेषु को नहि ?।
केषां स्तुतिः सदा कार्या?, **नो दुर्भावो महात्मनाम्** ॥५॥

सर्वत्र शं भवेत् कस्य?, भुङ्क्ते किं पशवः सदा? ।
सर्वज्ञः पश्यति किञ्च?, **निस्पृहस्य तृणं जगत्** ॥६॥

कस्मादाप्नोति शं सर्वे?, योगी ध्यायति कं हृदि? ।
किमिच्छिन्त्यखिला सत्त्वाः?, **संतोषात् परमं सुखम्** ॥७॥

---

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

१. कृपणस्य

# सम्पत्तौ च विपत्तौ च महतामेकरूपता
## (कौमुदीमित्राणन्दनाटकस्य परिचयः)

- *मुनिश्रीश्रुततिलकविजयः।

(गतेऽङ्केस्माभिर्जैननाटकसाहित्यविषये ज्ञातम्। तत्रापि श्रीरामचन्द्रसूरिभिर्विरचितस्य-सत्यहरिश्चन्द्रनाटकस्य परिचयः प्राप्तः। अधुना तेषामेव सूरिवराणामन्या कृतिः-[१]कौमुदीमित्राणन्द-प्रकरणम्-इत्यस्याः परिचयः कार्यते।)

### १. कृतिविषयः

यथाऽस्याः कृतेर्नाम सूचयति तथाऽस्मिन् कौमुदीनाम्न्याः कुलपतिकन्यायाः मित्राणन्दनाम्नः श्रेष्ठिपुत्रस्य च चरित्रं वर्णितम्। तच्च कृतिकारेण कल्पितमेवाऽस्ति। किन्त्वेतादृशेन चरित्रचित्रणेन कर्तुरभिप्रेतं किम्? कः खल्वस्य प्रकरणस्य ध्वनितार्थः? इति सावधानतया चिन्तनीयम्। एतत्तु पुनर्निरूपणीयं नास्ति यद्-एतादृशानां नाट्यादिकृतीनां प्रयोजनत्वेन केवलं मनोरञ्जनं कस्याऽपि विदुषोऽभिप्रेतं न स्याद्। न्यूनातिन्यूनं जैनसाधवस्तु केवलं मनोरञ्जनं तु दुर आस्ताम्, प्रधानहेतुत्वेनापि मनोरञ्जनमधिकृत्य प्रवृत्तिं न कुर्युः। यतस्ते जानन्ति रागादिभावानामभिवृद्धिरात्मानोऽहितकारिण्येव। अत एव शृङ्गाररसवर्णनेऽपि साधवस्सुनिश्चितां मर्यादां नातिक्रामन्ति। प्रस्तुतं प्रकरणमप्यनेनैव दृष्टिबिन्दुना प्रेक्षणीयमुचितम्। अत्र कौमुदीमित्राणन्दयोः प्रणयकथा वर्णयितुं नाभीष्टा। अपि तु अद्भुतरसस्य प्राधान्येन मित्राणन्दसदृशमेकमादर्शभूतं जीवनं प्रकटीकर्तव्यमित्याशयः कर्तुः। तस्मिन् जीवनवर्णने बहवो अंशास्सहजतया ग्रथिता ग्रन्थकृता। यथा-विपद्यपि धैर्यादच्युतिः, कपटवृत्तिनिन्दा, बलिप्रथागर्हा, परोपकारमहत्त्वमित्यादयः। संक्षेपेण कृतिसारोऽधः निरूप्यते।

---

* पू.आचार्यदेवेशश्रीमद्विजयशान्तिचन्द्रसूरि साम्राज्यवर्त्ती।

१. एषा 'नाट्यसाहित्यमाला-भाग-२' मध्ये प्रकाशिता।

## २. कृतिसार:

**प्रथमोऽङ्क:-**

श्रेष्ठिपुत्रो मित्राणन्दो आत्मीयाभ्यां मैत्रेयमकरन्दनामभ्यां मित्राभ्यां सह समुद्रमार्गेण व्यापारार्थं गच्छति। किन्त्वयं खलु संसारोऽत्र यथेप्सितं तु सम्राजोऽपि न भवति का कथा प्राकृतस्य जनस्य? भग्नं यानपात्रम्। मैत्रेयेन सह मित्राणन्दो एकस्मिन् फलकमारुह्य सप्तदिनानन्तरं कुत्रचिद् द्वीपे प्राप्त:। दृष्टा तत्र दोलाधिरूढा कौमुदी। अङ्कुरितश्चित्ते राग:। सा तु तिरोहिता। तस्या गवेषणार्थं तौ चलितौ। मार्ग एक: तापसोऽनयोस्स्वागतं करोति। स ज्ञापयति यद्-वरूणदेवस्य क्रीडाद्वीपोऽयम्। अत्र संन्यासिनो एवोषितुमर्हन्ति। प्रशान्तविरोधनाम्न्याश्रमयागत्य घोरघोणनामानं कुलपतिं वन्दध्वं यूयमिति। ता आश्रमे गच्छत:। धूर्त: कुलपति: तयोर्धनजिघृक्षया स्वीयां दुहितरं मित्राणन्देन सह परिणाययितुं सज्जीभवति। अत्रान्तरे वरूणदेवस्य पाशपाणेरागमनं भवति। अत्र प्रथमोऽङ्क: पूर्णीभवति।

**द्वितीयोऽङ्क: :-**

द्वीपे भ्रमन्तौ मैत्रेयमित्राणन्दौ मन्दिरस्य पृष्ठभागे गच्छत:। तत्रैक: पुरुषो वृक्षे किलित: प्रभूतपीडाक्रान्तो दृश्यते। कृपालोर्मित्राणन्दस्य हृदयं द्रवति। स तस्य बन्धनानि दूरीकर्तुं प्रयतते। तदानीमेव कौमुदी मित्राणन्दस्य विश्वाससम्पादनार्थं निर्व्याजं स्नेहं प्रदर्शयितुं चैकं मणिं प्रेषयति। तस्य प्रभावेन मित्राणन्द: पुरुषस्य बन्धनानि दूरीकरोति। स एको विद्याधरोऽस्ति। स दिव्यकण्ठिकाप्रभावेन स्त्रियो विलोभयन् परिभ्रमति स्म। अत एव क्रुद्धेन वरूणदेवेन स किलितो आसीत्। अथ बन्धनापगमानन्तरं स दिव्यवलयं दत्त्वा मैत्रेयं वदति यन्मम शरीरे यानि व्रणानि सन्ति तेषामुपर्यस्य वलयस्य लेपं कुरु। मैत्रेयस्तथा करोति। स कृतज्ञभावं प्रदर्शयति सहसा तत्र वरूणदेव आगच्छति तस्य प्रतिभयेन तस्याऽऽगमनात् पूर्वमेव विद्याधरो दिव्यवलयमलात्वैव पलायते। अत्र वरूणदेव: क्रोधेन मित्राणन्दं परुषविषये पृच्छति। उत्तरस्याऽप्राप्त्या मित्राणन्दमेव वृक्षेण सह बद्धुं प्रवृत्त:। तदानीमेव कुलपतिभ्राताऽऽगत्य सप्रश्रयं विज्ञपयति यदयं तु कुलपतिजामाता। तदा प्रसन्नीभूय वरूणदेवो मित्राणन्दं मोचयति। अपि च तस्मात् पुरुषात् प्राप्तां कण्ठिकामुपायनरूपेण प्रयच्छति। अत्र द्वितीयाङ्कसमाप्ति:।

**तृतीयोऽङ्क: :-**

कौमुदीमित्राणन्दावुद्याने परस्परं विश्रम्भजल्पं कुर्वत:। कौमुदी रहस्यमुद्घाटयति यद्-इदं तापसकुलं कपटपेटकमेव। य: कोऽपि धनाढ्यो भवेद् तेन सह मम परिणय: कार्यते तदनन्तरं पर्णशालायां तस्य हत्या क्रियते धनजिघृक्षया। अहं भवतस्समर्पिता अतो रात्रावेव

पूर्वसञ्चितान्याऽऽभरणान्याऽऽदायाऽऽवां पलायिष्यामः। मित्राणन्दः कौमुदी वचनमङ्गी करोति। द्वयोर्विवाहस्सम्पद्यते। हस्तमोचनपर्वणि पूर्वमन्त्रणानुसारं मित्राणन्दः कुलपतये विषापहारमन्त्रं याचते। विवाहानन्तरञ्च। पूर्वयोजनानुसारं द्वावपि पलायेते। अत्र तृतीयोऽङ्कः पूर्णः।

**चतुर्थोऽङ्कः :-**

कौमुदीमित्राणन्दौ सिंहलद्वीपराजधानी रङ्गशालापुर्यामागतौ। तत्र कात्यायनीमन्दिरे प्रविशतः। तदानीमेव नगरतस्करस्तस्मान्मन्दिराद् गुप्तमार्गेणाऽदृश्यीभवति। नगरतस्करस्याऽनुपदमेवाऽऽगतास्तलारक्षकादयश्चौरस्थाने मित्राणन्दं गृह्णन्ति राज्ञो विक्रमबाहोः पार्श्वं उपनयन्ति तम्। पूर्णोऽत्र चर्तुर्थोऽङ्कः।

**पञ्चमोऽङ्कः :-**

मन्त्री कामरतिः कौमुद्यामनुरागकारणतो मित्राणन्दस्य दण्डनाय बहुन् प्रयत्नान् करोति। किन्तु, तस्मिन्नेव समये राजपुत्रो लक्ष्मीपतिस्सर्पेण दष्टः कण्ठगतप्राणस्संजातः। तं मित्राणन्दो विषापहारमन्त्रप्रभावेन जीवयति। राजा राजपुत्रश्चात्यन्तानुनयेन कृतज्ञताभावं प्रदर्शयतः। राजा मन्त्रिणः कामरतेरादेशं यच्छति यद्-अस्मन्निर्विशेषेणाऽऽदरेणाऽस्य महापुरुषस्य परिचर्या कार्या। अत्र पञ्चमोऽङ्कस्समाप्तीभवति।

**षष्ठोऽङ्कः :-**

इतश्च मैत्रेयः कौमुदीमित्राणन्दाभ्यां वियुक्तः परिभ्रमन् रत्नाकरराज्यप्रदेशया-गच्छति। तत्र रत्नाकरनरेशो विजयवर्मा-यः खलु सिंहलनरेशस्य विक्रमबाहोस्सामन्तो राजा-सः चक्रसेननाम्ना शत्रुराजेन सह युद्धे प्राणापहारिभिर्निशातहेतिभिरभिहतो जीवनमरणमध्यवर्त्यासीत्। विजयवर्मणस्सैनिका मैत्रेयं विपक्षचारपुरुषं मत्वा गृहित्वा बद्ध्वा राज्ञस्समीप उपनयन्ति। गाढवेदनाक्रान्तो राजा विना विचारं वधादेशं यच्छति। तदा मैत्रेयो दिव्यवलयेन व्रणानि संरोहयति। अतो विजयवर्मा भूयांसं कृतज्ञताभावं दर्शयति। इतश्च दुष्टेन कामरतिना प्रपञ्चेन मित्राणन्दोऽत्र विजयवर्मपार्श्वे मारणाय प्रेषितः। विजयवर्मणा यक्षाय पुरुषबलिरुपयाचितोऽस्ति। मैत्रेयो यदेमां वार्तां जानाति तदा स कठोरशब्दैरिमां रीतिं खण्डयति। तथापि विजयवर्मणआग्रहेण वध्यपुरुषस्याऽन्तिमोपदेश-दानायाऽऽगच्छति। तत्र मित्राणन्दमेव वध्यत्वेन प्रत्यभिज्ञाय मैत्रेयस्तं परिष्वज्य रोदिति। विजयवर्मा स्वापराधस्य क्षमायाचनां करोति। अचलपुराद् बन्दिरुपेणाऽऽनीतां सुमित्राञ्च विवाहार्थं मित्राणन्दाय समर्पयति। तदा मित्राणन्दो वदति-अहं तु विवाहितः। मम भ्राता मकरन्दो एनां परिणेष्यति।

विजयवर्माऽङ्गीकरोति तदैव शत्रूणामाक्रमणेन रत्नाकरनगरेऽराजकता प्रवर्तते। अत्र षष्ठोऽङ्कस्संपूर्णः।

**सप्तमोऽङ्कः :-**

कौमुद्याः प्राप्त्यर्थं दुष्टेन कामरतिना मित्राणन्दस्तु मारणाय प्रेषितः किन्तु द्वितीयदिन एव कामरतिभार्यया सपत्नीशङ्कया कौमुद्यऽप्यऽमात्यो यथा न जानीयात् तथैकेन स्थविरेण सह निष्कासिता। सा मार्गे भ्रमन्ती सुमित्रया सह मिलति। परस्परं परिचयो भवति। वज्रवर्मनामा पल्लीपतिस्तत्सहायाश्च कौमुदीसुमित्रादीनवरुन्धन्ति। धनादिकं च गृह्णन्ति। तदैव पृष्ठत आगतवान् सार्थो वज्रवर्मणस्तस्करैरवरुद्धः। सार्थपतिर्वज्रवर्मणः पार्श्व आनीतः। स मित्राणन्दभ्राता मकरन्द एव। अस्मिन्नेव समये सिंहलनरेशस्य युवराज्ञोस्य दूतो आगत्य वज्रवर्मणे पत्रमर्पयति। तस्मिन् सूचना लिखिता यन्मार्गे कुत्रापि मित्राणन्दकौमुदीनामानौ जायापती मिलेतां तर्ह्यऽत्र प्रेषितव्यौ। वज्रवर्मोपस्थितान् जनान् नामादि पृच्छति। ततो ज्ञायते यद्-कौमुदी मित्राणन्दपत्नी, मकरन्दस्तद्भ्राता, सुमित्रा च मकरन्दाय वाग्दत्ता। तदा वज्रवर्मैव स्वापराधक्षमां याचित्वा सुमित्राया मकरन्देन सह विवाहोत्सवं योजयति। अत्र पूर्णस्सप्तमाङ्कः।

**अष्टमोऽङ्कः :-**

मकरन्दः कौमुदीसुमित्रयोस्समीपवर्तिनमेकचक्रनाम नगरं दर्शयितुमानयति। तत्रैको मायावी परदारासक्तः कापालिकः प्रपञ्चेन कौमुदीसुमित्रे स्वीये भवने स्थापयति। अयं मायावी वस्तुतस्स एव यं मित्राणन्दो वरुणदेवस्य क्रीडाद्वीपे वरुणदेवबन्धनान्मोचितवान्। मकरन्दस्तु यथाकथञ्चिद् कापालिकस्य प्रपञ्चादात्मानं मोचयित्वा, पलायित्वा स्वीये सार्थे प्रतिनिवर्तते। अत्र सार्थे नूतना विपन्मकरन्दस्य स्वागतं करोति। अत्र पूर्णोऽष्टमोङ्कः।

**नवमोऽङ्कः :-**

एको नरदत्तनामा कश्चिद् धूर्तो यं क्रयविक्रयकौशलानुरञ्जितो मकरन्दो अधिकारित्वेन नियुक्तवान् स सर्वां संपत्तिमात्मसात्कर्तुं कपटं कृतवान्। विवादस्सिंहल-नरेन्द्रस्य युवराज्ञः पार्श्व आगतः। अपरापरैः कपटजालैर्नरदत्तस्स्वपक्षं सत्यापितवान्। युवराजो मकरन्दस्य वधदण्डमुद्घोषयति। अत्रान्तर एव वज्रवर्मा युवराजस्य सूचनानुसारं मित्राणन्दं गवेषयित्वा तमादाय युवराजपार्श्वयाऽऽगतः। मित्राणन्दो यदा मकरन्दं पश्यति तदा हर्षोन्मत्तो भवति। युवराजो आत्मना कृतस्य मिथ्यादण्डस्य भृशं पश्चातापं करोति। अत्र पूर्णता नवमाङ्कस्य।

**दशमोऽङ्कः :-**

कापालिकवेषेण कौमुदीसुमित्रे कपटजाले पातयन् विद्याधरस्सिद्धाधिनाथस्ते द्वे नामवेषौ परिवृत्य स्वस्या अनुचर्या:लम्बस्तन्या भवने स्थापयति। मैत्रेयोऽपि रत्नाकर-नगरीभङ्गसमये मित्राणन्देन वियुक्तो मान्त्रिकरूपेणाऽत्र सिद्धाधिनाथस्याऽनुचर्या: कुन्दलताया भवने मान्त्रिकरूपेण स्थितस्सिद्धाधिनाथस्य सेवका: कुतश्चिदपि मित्राणन्दं वधायाऽऽनयन्ति तस्य वेशादिकं तथा परिवर्तितं यथा सिद्धाधिनाथस्तं न प्रत्यभिजानाति। स एतादृशीं परिस्थितिं निर्मापयति यद् कौमुदीहस्तेनैव मित्राणन्दस्य मारणं भवेद्। किन्तु, विधिवशात् सिद्धाधिनाथस्य स्पष्टं भवति यदयं मित्राणन्दो येन वरुणद्वीपे ममोपरि भृशं उपकार: कृत:। स अत्यन्तं लज्जितस्सन् क्षमां याचते। कौमुदीसुमित्रे तं समर्पयति। तत्रैव मैत्रेयस्य मकरन्दस्यापि च मेलनं भवति। सर्वे परस्परं मिलित्वा हर्षनिर्भरा भवन्ति। सिद्धाधिनाथस्य मङ्गलकामनया सह दशमोऽङ्क: प्रकरणं च संपूर्णतामेति।

नाटकमद्भुतरसमयं तत्त्वऽस्माभिरादा एव दृष्टम्। अत: प्रसङ्गास्तथा संयोजिता यथा तेषां सारनिरूपणमपि दुष्करम्। अत: कदाचिदस्मिन् सारनिरूपणे यदि क्लिष्टताऽनुभूयेत पाठकैस्तदा क्षन्तव्योऽयं जन:। प्रकरणमेवाऽऽन्तं पठनीयमिति विज्ञप्ति:।

## ३. कृतिवैशिष्ट्यम्

एषा कृतिर्द्वादशरूपकप्रकारेषु प्रकरणरूपा विद्यते। प्रकरणरूपायामस्यां कृतौ प्रकरणलक्षणानि यानि स्वयं कृतिकारैर्नाट्यदर्पणे निरूपितानि सुन्दररीत्या: संवदन्ते। तत्सर्वं विस्तरेण श्यामानन्दमिश्रमहोदयेन हीन्द्यनुवादयुक्ते पार्श्वनाथविद्यापीठेन प्रकाशिते कौमुदीमित्राणन्दपुस्तके भूमिकायां निरूपितं जिज्ञासुभिस्तत्र द्रष्टव्यम्, कृतौ पात्रचित्रणं नितान्तमस्मान् मुग्धीकरोति। मित्राणन्दस्य मित्रवत्सलता, परोपकार:, कृतज्ञता, निरहङ्कारित्वं, विनय:, इत्यादिकं नि:संदेहं तं धीरशान्ते नायक उपवेशयति। अत्र तत्र सुभाषितानां सूक्तीनां च ग्रथनं तु ग्रन्थकर्तुश्चित्ताकर्षकं वैशिष्ट्यम्। वज्रवर्मसदृशस्तस्करो यदा मातुर्महत्त्वं वर्णयेत् तदा तु यादृशस्य तादृशस्यापि प्रेक्षकस्य हृदयं भावार्द्रं भवेदेव। अपकारकारिष्वपि क्षमाशीलत्वं कीदृशं भवितुमर्हतीतीदं प्रकरणं सम्यक् ज्ञापयति। एवं प्राय: प्रतिपृष्ठं कश्चित्तूपदेश: प्राप्यत एव। तदेवाऽस्य प्रकरणस्य वैशिष्ट्यम्।

# किं नाम जैनीदीक्षा?

**-पू.मुनिश्री हितरूचिविजयस्य प्रवचनतः**

**- सङ्कलन-अनुवादकर्ता *मुनिश्री पुण्यश्रमणविजयः**

अनन्तोपकारिणा सर्वज्ञेन परमतारकेण परमात्मना श्रीमहावीरस्वामिना। षड्द्रव्यात्मकस्य जगतः सुदूरवगम्यानि रहस्यानि प्रकटीकृतानि सन्ति। इन्द्रियविषयातीता अनन्तधर्मात्मकाश्च सङ्ख्यातीताः पर्याया जगति सन्ति।

एकैकस्यापि दृष्टपदार्थस्य यावन्तो धर्मास्सन्ति, तान् तावतोज्ञातुं सहस्रजन्मभिरपि न शक्यम्। तर्हि मनोसंवेधात्मसंवेधयोश्च धर्माणां ज्ञानार्थमत्यन्तं कठिनता भवेदेव, तत्र नाश्चर्यं किमपि, तेषामदृष्टत्वात्। तयोः के धर्माः? कानि लक्षणानि? तत् ज्ञातुं न सुकरम्।

"जैनी दीक्षा" अपि कठिनतमः पदार्थोस्ति। यदा कोपि दीक्षां गृह्णाति तथा सर्वे वदन्ति यदनेन दीक्षा गृहीताया पृच्छ्यते किं नाम दीक्षा?

यथा देवदत्तो घटं गृह्णाति तथा सर्वे कथयन्ति यद् देवदत्तेन घटो गृहीतो, यतः सर्वे घटं जानन्ति, परं दीक्षां जानन्ति न वा खलु?

सर्वे पश्यन्ति-यदयं नाम-वेशयोः परिवर्तनं कारयति, तत एव सर्वैः कथ्यते यदधुनायं साधुरस्ति, संसारी नास्तीति, किन्तु किं यूयं जानीथ, यद् यस्य किमपि नाम नास्ति, तस्य नाम भवेन्न वा रूपरहितस्य वेशो भवेन्न वा? अद्यपर्यन्तं प्रश्नोयं कदापि मनसि भूतो न वा खलु?

पूर्वेषु भवेषु अस्माभिः सर्वैरप्यनन्तानि रजोहरणानि गृहीतानि किन्तु ज्ञानविकाशो न कृत अत एव वयं न सिध्यामहे।

अतः परमपि करिष्याम एवमेव, तर्हि न कोपि लाभो भवेत्। केवलमेक-

* पू.आचार्यदेवेशश्रीमद्विजयशान्तिचन्द्रसूरिसाम्राज्यवर्त्ती।

अजोहरणस्य वृद्धि र्भविष्यति, नान्यत् किमपि।

प्रव्रज्याग्रहणावसरे मुमुक्षुः गुरुं त्रिविज्ञप्तिं करोति, प्रथमा विज्ञप्तिः"**मम मुण्डावेह**" मां मुण्डयथ नाम मम मुण्डनं कुरुत। मम केशानुन्मूलयत वस्तुतः केशोन्मूलनं तु नापितः करोति। न गुरवः खलु। तथाप्येषा विज्ञप्तिः कथं गुरुं प्रति मुमुक्षुणा क्रियते?

अस्त्यत्र परमार्थः नाधुना केवलं केशलुञ्चनं कार्यं, किन्तु स्वात्मोपरिसंश्लिष्ट-कषायाणामपि लुञ्चनं कर्तव्यं, तदेव पारमार्थिकं लुञ्चनं कथ्यते। तत्कार्ये 'गुरुं विना न कोपि समर्थोस्ति।

* द्वितीया विज्ञप्तिः "**मम पव्वावेह**" "मम प्रव्राजयथ" अत्र शङ्का भवति, यत् कस्मात् कं प्रति प्रव्राजनं कार्यमस्ति? भवान् यानचालकं कथयति यन्मां हस्तिनापुरं नय। तदा सोपि भवन्तं नयति तत्र। इहापि किमेतादृशमेव गमनं कार्यमन्यद्वा।

वस्तुतरत्र बहिरात्मदशाया निर्गत्यान्तरात्मदशां प्राप्य परमात्मदशां प्रति गमनं कार्यम्। औदयिकभावान्निःसृत्य क्षायौपशमिकभावमार्गेण क्षायिकभावः प्राप्तव्यः। वस्तुस्थित्या हीदं प्रव्राजनं कथ्यते। गुरुः प्रबलनिमित्तकारणमस्त्यत्र गमने। गुरुः केवलं मार्गं दर्शयति, मार्गे चलनं तु स्वयमेव कर्तव्यं भवति।

* तृतीया विज्ञप्तिः "**मम वेसं समप्पेह**" मह्यं वेशं समर्पयथ इति। अत्र किं नाम वेशः? यद्यपि तन्तुवायोपि तुभ्यं वेशं समर्पयति, परमत्र न केवलं बाह्यवेशः परिवर्तनीयोऽपि तु स्वान्तःकरणमपि परिवर्तनीयम्। समुज्ज्वलभावचीवरेणात्मानमलङ्कृत्य वेशपरिवर्तनं कर्तव्यमस्ति। तदेव हि वेशपरिवर्तनमुच्यते महद्भिः।

सर्वे प्रव्रज्याग्रहणमहोत्सवे त्रिविज्ञप्तिं शृण्वन्ति, परं पश्चान्न किमपि, चिन्तयन्ति। आजीवनं श्रुतमऽप्यन्ते 'विनाङ्कं बिन्दव इव' भवति। बहवो जना जीवनं वृथा निर्गमयन्ति। तेषां स्वेषां जीवनविषये ज्ञानमपि कठिनमस्ति। त इदमपि न जानन्ति यदस्माभिः किं वृथा गमितम्। ते परोक्षभावजगद्विषये किञ्चिदपि ज्ञातुं द्रष्टुं चिन्तयितुं वा न समर्था भवन्ति।

पूर्वस्मिन् भवे मम्मणजीवेन प्रतिलाभितमोदकविषये पश्चात्तापः कृतः। परं कदा? यदा तेन मोदकांशः स्वादितस्तदा। तेन ज्ञातं यन्मया स्खलना कृता। किञ्चन गमितं मया। निर्विचारकजनैः ज्ञातमपि, न यदस्माभिः किञ्चन गमितम्। यतो न किञ्चिदास्वादितम्, तैः। पश्चात्तापमपि न कुर्वन्ति ते। उच्चैः "[1]मम बान्धवो दीक्षां गृह्णाति, अहो अहो अहो अहो" इति समुद्घोषणा हि तेषां कृते दीक्षा नाऽन्या आचरणरूपा।

१.भाषायां "मारो भईलो दीक्षा ले वाह भाई वाह, वाह भाई वाह"

यदा कोपि बालो राष्ट्रस्य नेता भवेत्तदा सर्वे वदेयुः-यदयं बाल एतादृशं महत्कार्यं वोढुं कथं समर्थो भविष्यति? परमत्र किञ्चिच्चिन्त्यते न वा?

दीक्षया सप्तराजलोकोर्ध्वं गन्तुं समर्था, सप्तराजलोकाधोगमनेऽपि समथाः, सन्ति ततः, सावधानं पुरोगमनं कर्तव्यं भवति।

यथा यथोच्चाधिकारा आगच्छन्ति तथा तथा लाभोऽपि प्रभूतो भवति, तेन सह यदि वयं साधवः सावधानेन न वर्तिष्यामस्तदाऽलाभो तादृश एव भविष्यति।

श्रीमरिचिः सुखशीलतायां, श्रीनंदिषेणश्च मानगर्तायां स्खलितः। वाचकवंशप्रधानाः श्री मङ्गुसूरिणो रसनापराभूता अभूवन्, तदा कर्मपरिणामराज्ञा तेषामपि दया न कृता।

घटादीनां क्रेता विक्रेता च भवति परं क्षमादीनां क्रेता विक्रेता वा कोप्यस्ति किम्? न, यतस्ते पदार्था न क्रेया विक्रेया वा, त आत्मना प्रादुष्कृत्यास्सन्ति तथैव तात्त्विकीदीक्षापि नादीयते दीयते वा। सात्मनि सात्मना प्रादुष्कर्तव्या।

दीक्षायां प्रकटीभूतायां प्रतिक्षणमल्पो लाभो भवति। प्रारम्भे स्खलना भवेत् परं पुनः पुनः परिभावनं कर्तव्यं, तेनैकदा स्वात्मानुभूति र्भविष्यति, पश्चाद्विषयसुखेच्छा नैव भविष्यति। आत्मानुभूतिं कर्तुं दशविधयतिधर्मस्य साधुसमाचार्यादीनाञ्च यथार्थं पालनं कर्तव्यं भवति।

यान्यनुष्ठानानि स्वात्मानुभूतिं कारयितुं समर्थानि तेष्वेव रमणं कर्तव्यम्। अपि तु न केवलं गोचरचर्या भ्रमणं, न केवलं वस्त्रादेः प्रतिलेखनं, न केवलं जलापूर्णघटानयनं। किन्तु स्वात्मानुभूतिरेव तात्त्विकी दीक्षा।

* जगति दीक्षया समानं सुखं नास्ति, परं यस्य समीपे सम्यग्ज्ञानदर्शनं नास्ति तस्य दुर्मतेः दीक्षया समानं दुःखमपि पृथिव्यां नास्ति।

यत्र यथावत् कृत्यं-आचारो नास्ति, विधिपूर्णं प्रतिलेखनं नास्ति, न भगवद्वचनस्मरणं, न स्वाध्यायधोषः, न समितिगुप्तिपालनं, पुनः पुनः खेदवचनं यथा "मयैव सर्वं कर्तव्यम्" "इदमेव मम कार्यं, नान्यद्" मम कार्यमियदेव नाधिकम्" इयतोऽधिकं नैव करिष्यामि "इत्यादि तत्र न दीक्षा, परं केवलं निष्फलं विफलं वा कायकष्टमस्ति।

शोभनतमो गुरुः भवेत् परं यदि वयं शोभना न भविष्यामस् ततः सुगुरुरपि न कल्याणाय किन्त्वकल्याणायैव भविष्यति। गोपालेन सङ्गमेन च साक्षात्परमात्मा प्राप्तः, परं तौ शोभनौ नास्तां, तर्हि सर्वजीवकल्याणमिच्छता भगवतापि तयोः कल्याणं न ततः प्रथमं वयं शोभना भवेम, पश्चात् सर्वं शोभनं भविष्यति इति।

# श्री स्थूलभद्रं मुनिपं स्मरामि

**-* मुनिश्री दर्शनरक्षितविजयः**

आद्वादशाब्दं स्थितवान् स्मरस्य, गेहे सदा यो विषये प्रसक्तः।
कामोऽपि छिन्नः खलु तत्र येन, तं स्थूलभद्रं मुनिपं स्मरामि ॥१॥

अमात्यमुद्रा भववर्धिकेति, विचिन्त्य सम्भूतिमुनेः समीपम्।
मुनीन्द्रमुद्रा शिवदा गृहीता, तं स्थूलभद्रं मुनिपं स्मरामि ॥२॥

सूत्रामदाशार्हहरादिदेवाः सुनर्तिता यद् वशवर्तिनो हि।
स मन्मथो येन विनाशितोऽरम्, तं स्थूलभद्रं मुनिपं स्मरामि ॥३॥

पूर्वाण्यधीतानि समानि येन, श्री भद्रबाहुप्रभुपादपार्श्वे।
श्रीस्थूलभद्राद् समपूर्ववेत्ता, तं स्थूलभद्रं मुनिपं स्मरामि ॥४॥

वेश्या सुरागा सरसश्च भोज्यं, कालश्च कामप्रसवः सुवेश्म ।
तथाऽपि कामो हृदये न जातस्, तं स्थूलभद्रं मुनिपं स्मरामि ॥५॥

यस्याभिधानस्मरणात् व्रजन्ति, कामार्त्तिदावानलदग्धनॄणां ।
सन्तापकारा विषमा विकारास्, तं स्थूलभद्रं मुनिपं स्मरामि ॥६॥

वैश्याकृतै र्विग्रहहावभावै, र्लास्यैर्विलासैर्हृदयं न यस्य ।
भिन्नं मनाग् यत् सुरशैलतुल्यं, तं स्थूलभद्रं मुनिपं स्मरामि ॥७॥

मुक्तिप्रभादर्शनकारिणीयं, यद् ब्रह्मगाथा भुवि गास्यते हि ।
ब्रह्मैकलीनं भवतीरप्राप्तं, तं स्थूलभद्रं मुनिपं स्मरामि ॥८॥

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरिसाम्राज्यवर्त्ती।

# शिष्याष्टकम्

-*मुनिश्रीप्रशमरक्षितविजयः

शिक्षायै यस्तु योग्योऽस्ति, स शिष्य उच्यते बुधैः।
शिष्यानुग्रहबुद्ध्या च, मया किञ्चिद् विशिक्ष्यते ॥१॥

चत्वारो वर्णिताः शिष्या, अभिजातः सुजातकः ।
जातवांश्च कुलाङ्गारस्-तत्तत्कृत्यानुमानतः ॥२॥

अधीतानेकशास्त्रार्थः, शासनोन्नतिकोविदः।
गुरोरप्यधिको गुण्य-भिजातः कथ्यते स हि ॥३॥

गुर्वाज्ञाराधनाप्रह्वः, सदाचारपरायणः।
गुरो र्योऽस्ति समानश्च, गुणे ख्यातो सुजातकः ॥४॥

गुरोरल्पगुणोऽपि यः, संयमबद्धलक्षकः ।
गुणे बद्धानुरागश्च, जातवान् शिष्यकः स हि ॥५॥

सावद्याचारसंमग्नो, गुरुनामकलङ्कदः।
शासनपरिपन्थी यः, कुलाङ्गार स उच्यते ॥६॥

पूर्ववर्णितशिष्येषु, तत् किं शिष्यत्वमुत्तमम्।
दीप्यते येन चारित्रं, शिष्य! हृदि विचारय ॥७॥

पालयोत्तमशिष्यत्वं, यदन्येऽपि च शैक्षकाः।
त्वां समालम्ब्य प्राप्यन्तां, शिष्यत्वमुत्तमोत्तमम् ॥८॥

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरिसाम्राज्यवर्त्ती।

# बहुरत्ना वसुन्धरा

-*मुनिश्रीदर्शनरक्षितविजयः

## सर्वं सत्वे प्रतिष्ठितम्

कर्णावतीपुर्यां पालडीविस्तारे एको मुस्लिमयुवा सुलेमान इति नाम्ना वसति। कर्मसंयोगेनैकया जैनकन्यया सह प्रेम जातं, पश्चात्परिणयनं जातम्। तेन मुस्लिमयूना जैनमुनिसम्पर्केण जैनधर्मस्य स्वरुपं सूक्ष्मरीत्या ज्ञातम्। मुस्लिमधर्मस्य धार्मिकशब्दा-नामर्थघटनं जैनधर्मरीत्या ज्ञातम्।

अकबरः – न विद्यते कबरः यस्य स इति सिद्धः,

खुदा – यः स्वयं आत्मानं वेत्ति इति अर्हन्,

अल्लाहः – न विद्यते ल्हायः यस्य स इति जैनमुनिः

स्वधर्मस्य धार्मिकशब्दानां स्पष्टार्थघटनं श्रुत्वा स जैनधर्मं प्रत्यत्यादरवान् जातः। जैनमुनीनां नित्यं संपर्केण तज्जीवने परिवर्तनमागतं, प्रतिदिनं जिनालये प्रभुदर्शनं, रविवासरे च जिनपूजां करोति। नमस्कारमहामन्त्रस्य प्रतिदिनं स्मरणं करोति। तस्य जिनधर्मं प्रति ईदृशीं श्रद्धां ज्ञात्वा तत्पितरौ तं बोधितुमागतौ। अस्मद्वंशपरंपरागतं मुस्लिमधर्मं हि त्वं सुखेन भजस्व, यदि त्वं जैनधर्मं न त्यक्ष्यसि तर्हिं वयमस्मद्धनभागं न दास्यामः। तदा तेन परमगौरवेन परमसत्त्वेन पित्रे कथितं, मह्यं पितुः संपत्त्यालं, संपत्तिरिहभवे सुखं दातुमलं भवति, किन्तु महापुण्योदयेन प्राप्तो जैनधर्मः शाश्वतसुखं प्रदाता। अतश्चिन्तामणीरत्नाधिकं करुणामयं जैनधर्मं प्राणान्तेऽपि न त्यक्ष्यामि। अन्ते सः पितुः संपत्तिं त्यक्त्वा स्वजनेभ्यो भिन्नमुषितुं लग्नः। अधुना जिनधर्मस्य पालनं सुष्ठु करोति।

(ल्हाय-गूर्जरदेशीयशब्दः)(कवरः-गूर्जरदेशीयशब्दः)

---

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

# प्रभुभक्तौ भ्रातरौ

मालवदेशे रत्नपुरीनगर्यां (सांप्रतकाले रतलाम इति नाम्ना प्रसिद्धायां) गेलडो नाम प्रसिद्धः परिवारः चिरान्निवसति, तत्परिवारस्य द्वौ भ्रातरावतिप्रभुभक्तिमन्तौ स्तः। कयाचिद् रीत्यावां प्रभुभक्तिं कुर्व इति विचार्य प्रशस्तां पुष्पपूजां कर्तुं समुद्यतौ, त्रिवर्षादारभ्य प्रतिदिनं रत्नपुरीसमीपग्रामात् प्रभूतानि पुष्पाण्यानीय रत्नपुरीस्थित-त्रयोविंशतिजिनालयेषु यांत्रिकवाहनेन स्वयं गत्वा प्रतिजिनमंदिरे भावपूर्वकं जिनदर्शनं कृत्वा चंगेरिकायां प्रभोः पुरस्सरं पुष्पाणि धृत्वा जलं पिबतः।

वर्तमानकालेऽपीदृशाः प्रभुभक्ता विद्यन्त इति केनचित् कविना कथितम् ''अहो बहुरत्ना वसुन्धरा''

# सफलं जीवनम्

-*मुनिश्रीप्रशमरक्षितविजयः

सफलं जीवनं तस्य, जीवने यस्य त्रितयम्।
मोक्षलक्ष्यं जिनाज्ञा च, सुकृतानि पदे पदे ।।

अनन्तोपकारिणोऽनन्तज्ञानिनोऽर्हत्परमात्मनः शासनं प्राप्तैः महापुरुषैः, अस्मिन्नसारे संसारे मनुष्यजन्म एव खलु दशदृष्टान्तैर्दुर्लभं कथितम्। तथाप्यतिप्रयत्नेन प्राप्ते मनुष्यजन्मनि जीवनं तु बहुमूल्यवद् वस्तु ह्यस्ति। किन्तु मनुष्यजन्मसार्थकतार्थं कार्यसिद्ध्यर्थं च त्विदं जीवनमस्ति। चतुर्गतिकसंसारे मनुष्यजन्म एवातिप्रशंसनीयं कथितं भगवता, न च मनुष्यजीवनं परित्यज्य देवतिर्यङ्नारकादिजीवनं प्रशंसापात्रं कथितम्। देवभवेऽपि समग्रसुखसामग्री प्रचुरप्रमाणवत्यस्ति, तथापि तत्र जीवनसाफल्यार्थं कोऽपि उपायो नास्ति। तिर्यग्जीवने पराधीनता सर्वत्र दृश्यते। नरकजीवने तु निमेषमात्रमपि सुखं न विद्यते। ततो जीवनसाफल्यार्थं परमात्मभि र्महापुरुषैश्चास्य मनुष्यजीवनस्यैव प्रशंसा कृता। एतादृशो मनुष्यजीवनस्य साफल्यार्थं त्रीणि वस्तून्युपदिष्टानि भगवता। कानि कानि वस्तूनि? तदुच्यते प्रथमं तु मोक्षलक्ष्यं, द्वितीयं जिनाज्ञा, तृतीयं च सुकृतानि, एतानि सर्वाण्यपि मोक्षप्राप्तेः कारणानि सन्ति। एतैस्त्रिभिर्जीवनस्य सफलता प्राप्यते प्राणिभिः। एतानि त्रीण्यपि अन्योन्यसङ्कलितानि सन्ति।

अथ प्रथमं मोक्षलक्ष्यमुच्यते-

-किमपि धर्मकार्यं सदा मोक्षलक्ष्यं पुरस्कृत्यैव कर्त्तव्यम्। यत्र मोक्षलक्ष्यं तत्र जिनाज्ञापक्षो भवति । जिनाज्ञापक्षं विना कदापि प्राणिनां मनसि मोक्षलक्ष्यं न भवतीति

* पू. आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्ती।

त्वन्वयव्यतिरेकव्याप्तिरत्र घटत एव। मोक्षलस्याभाववती क्रियाऽप्यभव्यजीवेषु दृश्यते। किन्तु मोक्षलक्ष्याभाववती कृता समग्राराधना स्वात्मसिध्यर्थं न भवति। प्रत्युतानर्थाय संसारवर्धनाय च भवति। यथा कोऽपि जन: प्रवासाय निर्गतवान् भवेत्। किन्तु मया कुत्र गन्तव्यं तस्य चेत् ज्ञानं तस्मै न भवेत्, तदा स स्वेष्टस्थानं कदापि न प्राप्नोति। तथैव वयं सर्वे धर्माराधनां कुर्म:। तथापि चेत् मोक्ष: लक्ष्यं न भवेत्, तदा सा धर्माराधना सर्वापि स्वेष्टसाध्यसिद्ध्यर्थं न समर्था भविष्यति।

द्वितीयं तु जिनाज्ञा-

इयं जिनाज्ञापि मोक्षलक्ष्येण सहैव सङ्कीर्णाऽस्ति। जिनाज्ञा अर्थात् जिनभाषितस्य पालनं, जिनभाषिते च श्रद्धा इत्यर्थ: कर्तव्य:। कलिकालसर्वज्ञश्रीहेमचन्द्राचार्योऽपि स्वरचितश्रीवीतरागस्तोत्रे कथितवान्। यत्

''आज्ञाऽऽराद्धा विराद्धा च, शिवाय च भवाय च''-

अर्थात् जिनभाषितस्य यथाशक्तिपालनं सा जिनेश्वराणामाज्ञाया आराधना भवति। स्वशक्तिं विगोप्य अज्ञानञ्चाश्रित्य, तस्या: खण्डनं, सा विराधना भवति।

तस्या आराधना च विराधना च किंफला भवति? इत्याह तस्या आराधना शिवाय च अर्थात् आत्मन: शुद्धस्वरुपप्रकटनाय भवति। विराधना तु भवाय च, यस्मिन् भवति प्राणीति भव: अर्थात् संसार:, तस्मै इति भवाय, अर्थात् संसारवर्धनाय भवति। अत: एतादृशी जिनाज्ञा सर्वै र्जैनै: सदाऽऽदरणीयाऽस्ति शास्त्रेष्वपि तस्या: अतिमहत्त्वं दर्शितम्। यत्

आणाइ तवो आणाइ, संजमो तह य दाणमाणाए।
आणारहिओ धम्मो, पलाल-पुल्लूव पडिहाइ।। संबोधसित्तरी-८०।।

आणाइ इत्यादि० जिनाज्ञया कृतं तप: तदेव सम्यक्तपोऽस्ति जिनाज्ञया पालित: सप्तदशविधसंयम:, स एव सम्यक्संयमोऽस्ति तथा च जिनाज्ञया सत्पात्रेभ्यो दत्तं दानं तदेव सम्यग्दानमस्ति। अन्यथा तु जिनाज्ञारहितमाचरितं सर्वमप्युत्कृष्टानुष्ठानं तृणसङ्घातवत् प्रतिभाति-प्रतिभासते इत्यर्थ:।

जिनाज्ञाखण्डनकारिणां सर्वमपि धर्मानुष्ठानं निरर्थकमेवास्ति दर्शयति यत्

आणाखंडणकारी, जइ वि तिकालं महाविभूईए।
पूएइ वीयरायं, सव्वं पि निरत्थयं तस्स।। संबोधसत्तरी-८२।।

आज्ञाखंडनकारी, यत्तदोर्नित्यसंबधत्वात्, य: यद्यपि ''तिकालं'' त्रयाणां कालानां समाहार इति त्रिकालं अर्थात् प्रभातमध्याह्नसायं कालं। ''महाविभूइए'' रत्न-सुर्वणरूप्यादिमहाविभूत्या महासंपदा। ''वीयराय'' विशेषेण इत: गत:, राग: यस्मात् स इति

वीतरागः, तं वीतरागं, ननु रागस्य केवलं ग्रहणं किं कृतं? द्वेषस्य अपि ग्रहणं कर्तव्यं, यथा संसारस्य कारणं रागोऽस्ति तथैव द्वेषोऽपि, उच्यते-द्वेषोऽपि रागजन्यत्वात् द्वेषस्य मूलकारणं रागोऽस्ति, ततोऽत्र केवलं रागस्यैव ग्रहणं कृतम्। 'पूएइ' पूजयति अर्चति, 'तस्स' इति आज्ञाखंडनकारिणः, 'सव्वं पि' अर्थात् सर्वमप्यनुष्ठानं 'निरत्थयं' निरर्थकं निष्फलं, भवति इति अध्याहारः। पुनः आज्ञाखण्डनकारिणः कीदृशं फलं स्यात् इति शास्त्रकारः दर्शयति यत्-

रन्नो आणाभंगे, इक्कुच्चिय होइ निग्गहो लोए।
सव्वन्नूआणाभंगे, अणंतसो निग्गहो होइ।।

-शास्त्रसंदेशमाला-संबोधप्रकरण गा. ३७९।।

राजादिष्टाज्ञाऽकरणात् 'लोए' अर्थात् लोके जगति, जनस्येत्यर्थः इक्कुच्चिय सकृदेव, निग्रहो मरणस्य निबन्धनं भवति। परं च सर्वज्ञानां आज्ञाखण्डनं, अनंतशः निग्रहः मरणस्य हेतुः भवति। अत्र मरणात् जननमपि ग्राह्यं, यतो जननं विना मरणं न भवतीति सूचनार्थः। एवं आज्ञाकारित्वं सर्वत्र प्रसिद्धम्। व्यवहारेऽपि दृश्यते-यथा किंकरोऽपि यदा आज्ञाकारी, तदा सर्वत्र प्रशंसनीयो भवति, परं चाज्ञाखण्डनकारी, स पदे पदे निन्दनीयोऽपमानपदं भवति। ततः तीर्थंकराणां त्रिविधेनाऽऽज्ञाकारी, कथं प्रशंसनीयो नो भवेत्। इति सा जिनाज्ञाऽपि जीवनसाफल्यस्य द्वितीयाङ्गमस्ति।

अथ तृतीयाङ्गं-तु सुकृतानि पदे पदे अर्थात् आत्मिकगुणप्रकटनाय सदा श्रावकाः स्वजीवने शुभकार्याणि कुर्युः। अप्राप्तगुणप्राप्त्यै प्राप्तगुणरक्षणाय सुकृतानि पुनः पुनः कर्तव्यानि। जीवनस्य चान्तिमक्षणे सुकृतानां त्वनुमोदनाऽपि सुगतिहेतु र्भवति। स्वजीवने कृतानि सुकृतानि निरन्तरमनुमोदमानाः शालिभद्र-धन्नाजीर्णश्रेष्ठ्याद्यनेकमहाभागाः स्वेष्टफलं प्राप्ताः। यदि जीवने सुकृतानि कृतानि भवेयुः, तदा तेषामनुमोदनाप्रसंगो भवेत्, अपि चेत् सुकृतानि कृतानि न भवेयुः, तदा कथमनुमोदनाऽवसरो भवेत्। सुकृतकरणप्रभावेन संप्रतिकुमारपालवस्तुपालधरणाशापेथडशाऽऽद्यनेकमहाभागैः स्वधनव्ययेन जिनशासन-स्याऽद्भूताप्रभावना कृता, तेषां सुकृतानामनुमोदनापि बोधिबीजस्या-ऽवन्ध्यकारणं संसारसागरतारणतरीवदस्ति। अतः स्वधनव्ययेन श्राद्धैः सुकृतानि ह्यवश्यमेव कर्तव्यानि। जीवनस्य साफल्यार्थमेतानि त्रिपदानि शास्त्रकारै दर्शितानि। एतेषु सदैव प्रयत्नः कर्तव्यः।

# तत्त्वसर्वस्वम्

**- मूलकारः पूर्वमहर्षिः**
**- श्लोकवार्त्तिककारः 'प्रियम्'**

**निःसङ्गो निर्ममः शान्तो, निरीहः संयमे रतः।**
**यदा योगी भवेदन्तस्-तत्त्वमुद्भासते तदा ।। मूलम् ।।**

यत्किञ्चिद्गोचरा सक्तिः, सङ्ग इत्यभिधीयते ।
कामक्रोधादिदोषाणां, हेतुर्नातः परो मतः ।।१।।

भगवन्तोऽपि यत्प्राहु-**र्गीतायां** प्रकटाक्षरम् ।
**सङ्गात् सञ्जायते कामः, कामात् क्रोधोऽभिजायते** ।।२।।

**क्रोधाद भवति सम्मोहः, सम्मोहात् स्मृतिविभ्रमः ।**
**स्मृतिभ्रंशाद् बुद्धिनाशो, बुद्धिनाशात् प्रणश्यति** ।।३।।

सङ्गो दुखं ततो दुःखं, तस्मान्निः सङ्गता सुखम् ।
यदा निःसङ्गतोदेति, तत्त्वमुद्भासते तदा ।।४।।

आत्मैश्वर्य मतं तत्त्वं, सङ्ग इहाऽऽत्मविप्लवः ।
रोरस्य स्यात् कुतो राज्यं ? तत्त्वं सङ्गवतः कुतः ? ।।५।।

तस्मात् सर्वप्रयत्नेन, योगी निःसङ्गतां व्रजेत् ।
कृतनिःसङ्गतायोगो, योगी 'योगी' यतो भवेत् ।।६।।

ममेति येह संवित्ति-र्बाह्यान्तर्वस्तुगोचरा ।
सैषैव भवमाता तु, भीम-भीम-भयङ्करा ।।७।।

न रोगान्नापि वार्द्धक्या-न्नापमानान्न नाशनात् ।
जनोऽयं क्लिश्यते बाढं, ममकाराद्धि केवलात् ।।८।।

एष रोगो जराऽप्येष, नापमानमतः परम् ।
मृत्युर्य उच्यते सोऽयं, ममकारो हि तत्त्वतः ।।९।।

रोगादिपीडिते देहे, याऽऽत्मनो जायते व्यथा ।
किं ममत्वं विना तस्यां, तत्त्वतोऽस्ति निबन्धनम् ।।१०।।

द्वे पदे सुख-दुःखाभ्यां, निर्ममेति ममेति च।
ममेति दुःखमाप्नोति, न ममेति सुखी भवेत् ।।११।।

निर्ममत्वं महाराज्य-मेषा स्वर्गाभिधाऽपरा ।
अध्यक्षो मोक्ष एवैष, जीवन्मुक्तिरियं परा ।।१२।।

सुखं सुखसमाबन्धि, नैतदनृतमुच्यते।
पश्य निर्ममसौख्येन, तत्त्वसौख्यं विकृष्यते ।।१३।।

अन्तः समाधिसंवृष्ट्या, परितः परिनिर्वृतः।
शान्तकोपादिवह्निर्यः, स शान्त इति कथ्यते ।।१४।।

स्वेच्छोच्छलद्विकल्पौघ-वीचिवारलयोदयात्।
स्तिमितोदधिसङ्काशः, स शान्त इति कथ्यते ।।१५।।

सकोपेऽपि हि निष्कोपः, समोहेऽपि हि मोहमुक् ।
नीरागो यः सरागेऽपि, स शान्त इति कथ्यते ।।१६।।

आक्रुष्टोऽपि य आश्वस्तो, न्यक्कृतोऽपि हि निर्भृतः।
आहतोऽपि हि साह्लादः, स शान्त इति कथ्यते ।।१७।।

सानुरागां स्त्रियं दृष्ट्वा, मृत्युं वा समुपस्थितम् ।
अविह्वलमनाः स्वस्थः, स शान्त इति कथ्यते ।।१८।।

सर्वाण्यपि हि शास्त्राणि, दुस्तपानि तपांसि च।
सर्वा दीक्षा मुमुक्षूणां, केवलं शान्तताऽऽप्तये ।।१९।।

अद्य कल्येऽपि कैवल्यं, शान्तभावेन, नान्यथा।
क्षणमपि क्षमो नात्र, तत् प्रमादः सुखार्थिनाम् ।।२०।।

सर्वात्मना निलीयेत, यदाऽऽत्मा शान्तनीरधौ,
गुणक्रीतं स्वतो ह्यन्तस्तत्त्वमुद्भासते तदा ।।२१।।

स्वद्रव्यापेक्षया तृष्णा, या परद्रव्यगोचरा ।
ईहा सा प्रोच्यते यस्याः, सर्वानर्थपरम्परा ।।२२।।

सुधाभोज्यमनादृत्य, विष्टाहृतिस्पृहा यथा।
स्वीयद्रव्यमनादृत्य, परद्रव्यस्पृहा तथा ।।२३।।

परस्त्री हि परित्याज्या, तत्परत्वस्वभावतः।
स्वस्त्रियामपि तुल्यः स, तत्परत्वानपायतः ।।२४।।

परस्त्र्येव परद्रव्यं, तदीहाऽपि भयङ्करा।
वध-बन्ध-व्यथाः सूते, यत एषाऽविशेषतः ।।२५।।

परस्त्रियाः स्पृहां कुर्वन्, यथा नश्यत्यसंशयम्।
अभिलषन् परद्रव्यं, तन्नाशं नश्यति ध्रुवम् ।।२६।।

निरीहता ततो न्याय्या, निरीतिताभिलाषिणाम्।
ईतिरेतावती ज्ञेया, निरीहताच्युतिर्हि या ।।२७।।

निरीहतासमाराध्यं, कथञ्चिच्च तदात्मकम् ।
तत्त्वं तत् त्वं परिज्ञाय, तदुद्भासाऽऽदरं कुरु ।।२८।।

हिंसादिविरतिः सम्यक्, पञ्चेन्द्रियविनिग्रहः ।
क्रोधादिविजयश्चित्त-वाक्-कायानां निरुन्धनम् ॥२९॥

स एष संयमः प्रोक्तः, प्रोक्तसिद्धयध्वभिः स्फुटम् ।
यत्र प्राप्ते न किं प्राप्तं, दृष्टे दृष्टं? श्रुते श्रुतम्? ॥३०॥

दुःखाम्भोधितरी ह्येष, कष्टदावाग्निनीरदः।
मोहाऽऽमयौषधं चैष, परस्मात् परमस्तथा ॥३१॥

सुखोपनिषदेषैव, संयमस्यादृतिर्हि या।
या संयमहतिः सैव, दुःखोपनिषदुच्यते ॥३२॥

भारमात्रं हि तज्ज्ञानं, तत् तपश्चात्मवञ्चनम् ।
यत्र न संयमस्फाति-र्न तत्पक्षोऽपि विद्यते ॥३३॥

संयमो हि परं तत्त्वं, लक्ष्यं संयम एव हि।
एतदधिगतेः पश्चा-दधिगम्यं न शिष्यते ॥३४॥

रतानां स्वर्ग एवैष, परेषां निरयस्तथा ।
तत्त्वमुद्भासते स्पष्ट-मेतद्रतमहात्मनाम् ॥३५॥

निःसङ्गो निर्ममः शान्तो, निरीहः संयमे रतः।
यदा योगी भवेदन्तस्-तत्त्वमुद्भासते तदा ॥३६॥

निपीय नितरामेत्-तत्त्वरसमहामृतम् ।
**परमां तृप्तिमासाद्य, यातु विश्वं परं पदम्** ॥३७॥

# तपोमहिमागानम्

- *साध्वीजीश्री प्रशमनिधिश्री

तपः शिवाध्वपाथेयं, तपःसर्वार्थ साधकम्।
तपः क्लेशाग्निपाथोदं, तपः दौर्गत्यबाधकम् ॥१॥

तपो मुक्तिवधूद्वाहे स्मराम्यहमहर्निशम्।
यावन्न मोक्षलाभः स्यात्, तावत्तपः समाचरेत् ॥२॥

तपसा निर्जरा बह्वी, दुर्भेदकर्मणामपि ।
तपसा निर्वृत्तिः साक्षाद् संसारेऽप्यनुभूयते ॥३॥

तपसे सौख्यदायाऽस्तु, नमो दौर्भाग्यवारिणे।
तपसे कामदायाऽस्तु, नमो दारिद्र्यदारिणे ॥४॥

तपसस्त्रस्यति मोहः, काकनाशं च नश्यति।
तपसो भोजनासक्तिः, देहरागश्च लीयते ॥५॥

तपसो महिमागानं, कुर्वते सद्गुरुव्रजाः।
तपसः स्मरणं श्रेष्ठं, माङ्गल्यकृद् शरणं परम् ॥६॥

तपसि "**प्रशमो**" वर्यः, श्रेयस्करी च नम्रता।
तपसि राजते नित्यं, सम्यग्दर्शनसद्गुणः ॥७॥

---

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरिसाम्राज्यवर्त्तिनी।

# श्रेयस्करीजिनस्तुतिचतुर्विंशी

- साध्वजीश्री प्रशमनिधिश्रीः

**श्री श्रेयांसजिनस्तुतिः**

**छन्दोनाम :-** एकविंशत्यक्षरीय प्रकृतिजातौ '**स्रग्धरा**' नाम समवृत्तम्।

**वर्णन्यास :-** ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

**सप्तभिः सप्तभिरक्षरैः त्रिः विरामः ।**

**श्लोकः :-** **श्रेयश्श्रेयस्प्रभावन् ! धिषणधिषणयाऽज्ञेय ! श्रद्धेय ! धेय !,**
**वामाऽवामाऽविनाशिन् ! बुधविबुधविभो ! विश्वविश्वैकत्रायिन्!,**
**सम्यक्सम्यक्त्वभाजां, हृदयहृदयभृत् ! भव्यभव्यालिकारिन् !,**
**श्रेयान् ! श्रेयांसि देहि, प्रशमप्रशमयिन् ! विष्णुतुक् ! विष्णुतोक!**

**अन्वयः :-** श्रेयश्श्रेयस्प्रभावन् !, धिषणधिषणया अज्ञेय !, श्रद्धेय !
धेय!, वामाऽवामाऽविनाशिन्, बुधविबुधविभो!,
विश्वविश्वैकत्रायिन् !, सम्यक्त्वभाजां सम्यक्
हृदयहृत् !, अयभृत् !, भव्यभव्यालिकारिन् !,
प्रशमप्रशमयिन्!, विष्णुतुक् !, विष्णुस्तोक !,
श्रेयान्! श्रेयांसि देहि ।

**विवरणं :-** **श्रेयश्श्रेयस्प्रभावन्**...। हे **श्रेयश्श्रेयस्प्रभावन्** !- श्रेयः - श्रेष्ठः, श्रेयः- कल्याणं, एव प्रभा-कान्ति र्यस्य स तत्संबोधनम्। **धिषणधिषणया** धिषणः - सुरुगुरुस्तस्य, धिषणा - प्रज्ञा - मतिस्तया । **अज्ञेय !-**

* पू.आचार्यदेवेशश्रीमद्विजयरामचन्द्रसूरि साम्राज्यवर्त्तिनी।

अकलनीय !, श्रद्धेय ! श्रद्धापात्र !। धेय! - आराध्य!- सेव्य!। **वामाऽवामाऽविनाशिन्** ! -**वाम**! -सुंदर!। **अवाम**! - अप्रतिकूल! -दक्षिण!। **अविनाशिन्** ! -अक्षयस्थितिक !। **बुधविबुधविभो**!-बुधा: - विद्वांस:, विबुधा:-देवास्तेषां विभु:-स्वामी य: स तत्संबोधनम्। **विश्वविश्वैकत्रायिन्**। - विश्वं - समस्तं, विश्वं-जगत्, तं त्रायते इत्येवंशील: य: स तत्संबोधनम्। **सम्यक्** -सुष्ठु, **सम्यक्त्वभाजां** - सम्यग्दृष्टीनां, **हृदयहृत्**! हृदयं-मानसं हरति य: स, तत्सम्बोधनं हृदयहृत्!। **अयभृत्**! अयं-भाग्यं, तं बिभर्त्ति य: स तत्संबोधनम्। **भव्यभव्यालिकारिन्**!-भव्यानां-भविजीवानां, -भव्यानां - कल्याणानां आलिं-श्रेणिं करोति य:, स तत्संबोधनम्। **प्रशमप्रशमयिन्**! प्रशम: प्रकर्षेण शम: - शांति:, प्रशम् - प्रकर्षेण सुखं अयते-प्राप्नोति य: स तत्संबोधनम्। **विष्णुतुक्**! -विष्णुरिव तोजयति - शोभते य: स। विष्णुतोक !- विष्णुनामनृपनन्दन !। श्रेयान्! श्रेयांसाभिधतीर्थकृत् ! मां इति गम्यं, **श्रेयांसि**-कल्याणानि । **देहि** - अर्पय ।।११।।

**वृत्तवैशिष्ट्यं :**-अत्र सर्वपादगताऽदि-मध्याऽव्यपेत यमकालङ्कार:।

एतदेकविंशत्यक्षरीयप्रकृतिजातौ **'स्रग्धरा'** नाम समवृत्तम्।

तल्लक्षणं तु सिद्धहेमच्छंदोनुशासने द्वितीयेऽध्याये ३४५ तमे सूत्रे इत्थं "प्रकृतौ म्रौ भ्नौ यि: **स्रग्धरा** छछै:" छछैरिति सप्तभि: सप्तभिरक्षरै र्विराम:।

* * *

**श्री वासुपूज्यजिनस्तुति:**

**छन्दोनाम :-** अष्टाक्षरीयानुष्टब्जातौ **'समानिका'** नाम समवृत्तम्।

**वर्णन्यास :-** ऽ।ऽ ।ऽ। ऽ।

**श्लोक: :-** **वासुपूज्य ! पूज्यपूज्य ! बोधिदाऽसमानमान ! ।**
**विश्वनाथ ! राजराज !, रक्ष रक्ष मां तमोभ्य: ।।१२।।**

**अन्वय: :-** पूज्यपूज्य !, बोधिद !, असमानमान!, विश्वनाथ !, राजराज !, वासुपूज्य ! मां, तमोभ्यो रक्ष रक्ष ।

**विवरणं** :- **हे वासुपूज्य...।** हे **पूज्यपूज्य** ! पूज्यानां-इन्द्रादीनां अपि पूज्य - पूजनीयः यः सः तत्संबोधनम् । बोधिं ददातीति- **बोधिदः**, तत्संबोधनम् बोधिद । सम्यग्दर्शनदायक ! । **असमानमान** ! असमानं - अद्वितीयं, मानं - सन्मानं यस्य सः, तत्संबोधनम् । **विश्वनाथ** ! विश्वस्य-जगतः,-नाथः - स्वामी यः सः, तत्संबोधनम् । **राजराज** ! - राजा इव चन्द्रमाः इव राजते यः स तत्संबोधनम् । हे **वासुपूज्य** ! वासुपूज्यनामतीर्थनाथ ! **मां**-संपूर्णतया त्वच्छरणागतं । तमोभ्यः - पापेभ्यः **रक्ष रक्ष** तारय तारय ।।१२।।

**वृत्तवैशिष्टयं** :- अत्र त्रिपादगताऽन्त्याऽव्यपेत-यमकालङ्कारः।
एतदष्टाक्षरीयाऽनुष्टुब्जातौ 'समानिका'-नामसमवृत्तं ।
तल्लक्षणं तु सिद्धहेमछंदोऽनुशासने द्वितीयेऽध्याये '८३' तमे सूत्रे ''र्-जौ ग्-लौ **समानीति**''

* * *

## श्री विमलजिनस्तुतिः

**छन्दोनाम** :- द्वादशाक्षरीयजगतीजातौ **'कुसुमविचित्रा'** नाम समवृत्तम्।

**वर्णन्यास** :- ।।। ।ऽऽ ।।। ।ऽऽ

**श्लोकः** :- **कमलजनेत्रं भविजनमित्रं, विमलचरित्रं परमपवित्रम्।**
**दुरिततमिस्र-प्रशमनमित्रं, विमलजिनेन्द्रं प्रणम भवित्रम्।।१३।।**

**अन्वयः** :- कमलजनेत्रं, भविजनमित्रं, विमलचरित्रं, परमपवित्रं, दुरिततमीस्रप्रशमनमित्रं, भवित्रं, विमलजिनेन्द्रं प्रणम ।

**विवरणं** :- **कमलजनेत्रम्...।** हे आत्मन् इति गम्यते । त्वं **विमलजिनेन्द्रं**-विमलतीर्थनाथं, **प्रणम** - नमस्कुरु । कीदृशं? - **कमलजनेत्रं** कमलं - जल, तस्मिन् जाते ये ते कमलजे - पङ्कजे इव नेत्रे यस्य स तं। पुनः कीदृशं? - **भविजनमित्रं** भविजनानां - भव्यजन्तूनाम् मित्रं - सखा यः स तं । पुनः कीदृशं? **विमलचरित्रं** विमलं - निर्मलं चरित्रं - शीलं यस्य स तं । पुनः कीदृशं? परमपवित्रं परमश्चासौ पवित्रश्च - परमपवित्रः श्रेष्ठशुद्धः यः स तं। पुनः कीदृशं? - **दुरिततमिस्रप्रशमनमित्रं** दुरितानि - **पापानि** एव तमिस्राणि - तमांसि - दुरिततमिस्राणि, तेषां प्रशमनाय -

विनाशनाय, मित्रः - सूर्यः इव यः, स तं। पुनः कीदृशं? - **भवित्रं** - भविनः - भव्यजन्तून् त्रायते यः स तं ।।१३।।

**वृत्तवैशिष्टयं :-** अत्र प्रथमतृतीयद्वितीयचतुर्थ पादगतव्यवहिताऽन्त्ययमकालङ्-कारः। एतद् - द्वादशाऽक्षरीय जगतीजातौ 'कुसुमविचित्रा' नाम समवृत्तम्। तल्लक्षणं तु सिद्धहेमछन्दोनुशासने १६८ तमे सूत्रे "न्-यौ न्-यौ कुसुमविचित्रा" इति।

* * *

**श्री अनन्तजिन स्तुतिः**

**छन्दोनाम :-** अष्टाक्षरीयाऽनुष्टूब्जातौ **'पथ्या'** नाम समवृत्तम्।

**वर्णन्यास :-** **अत्र प्रतिपादं विषमवर्णन्यासत्वात् विषमवृत्तम् ।**

**श्लोकः :-** **हं महामं रधाराधं, धराधारं महामहं ।**
**मरमारमनंतं सं, सं तं नम रमारमं ।।१४।।**

**अन्वयः :-** हं, महामं, रधाराधं, धराधारं, महामहं,
मरमारं, सं, सं, तं, रमारमं, अनंतं, नम ।

**विवरणं :-** **हं महामं....**। हे आत्मन् ! इति गम्यं । त्वं **अनंतं** - अनंतनाम चतुर्दशतीर्थनाथं । **नम** - नमस्कुरु । कीदृशं? **हं**-वीरं-कर्मशत्रुजेतृत्वात्। "**होऽथ वीरे** रुद्रे भयङ्करे" इति। परमानन्द-नन्दनरचित-परमानन्दीयनाममालायां । पुनः कीदृश? **महामं** - महासुखावहं - मुक्तिसुखदायकत्वात् । "मकारमीश्वरं विद्याज्ज्योतिरक्तं **सुखावहं**" इति अज्ञातविद्वत्कृतैकाक्षरनाममालायां। महाँश्चासौ मः - सुखावहः यः स तं। पुनः कीदृशं? **रधाराधं**-मानव-धर्मरतिवर्धकं। **रः**-मनुष्यः तस्य धा-धर्मरतिस्तां राधयति-वर्धयति यः स तं । रः नरः-"**रः** स्मरे तीव्रे वैश्वानरे शब्दे वज्रे **नरे**।" इति महिपसचिवकृतैकाक्षरसंज्ञ-कांडे । **धा**-धर्मरतिः "**धा च धर्मरतिर्मता**" इति अज्ञातविद्वत्कृतैकाक्षरकोषे । पुनः कीदृशं ? - **धराऽऽधारं** - धरायाः-पृथ्व्याः आधारः - आश्रयः यः स तं । पृथ्वीस्थितजीवाऽऽधारत्वात् आधारे आधेयोपचारः । पुनः कीदृशं? - **महाऽऽमहं** - महान्त-श्चासौ आमाः - रोगास्तान् हन्ति यः स तं। पुनः कीदृशं। **मरमारं**-दर्प-

कन्दर्पनाशकं। **म:**-मान:-दर्प: ''**म:** स्त्रियां मञ्जुकायां च लक्ष्म्यां **माने** च मातरि'' इति हरितालराजा-ऽमात्यकृतैकाक्षरशब्दमालायां। **र:** - काम: - कन्दर्प: ''**रश्च कामे**'' इति महाक्षपणकविरचितैकाक्षरकोषे । म:- मानश्च, र: - कामश्च, मरौ तौ मारयति य: स तं। पुन: कीदृशं? **सं**- सनातनं - शाश्वतं ''**सनातने** सत्यवति शंकायामव्ययस्तु **स:**। सङ्गार्थे शोभनार्थे च प्रकृष्टार्थ समर्थयो: ।।'' इति कालिदास-व्यासकृतैकाक्षरनाममालायां । पुन: कीदृशं? - संथं ''सङ्गार्थे शोभनार्थे च प्रकृष्टार्थसमर्थयो:। प्रथमान्तस्तद: स्थाने, स्मृतौ लक्ष्म्यां च **सो**च्यते।।'' इति सुधा-कलशमुनिरचितैकाक्षरनाममालायां। पुन: कीदृशं? - **तं** - शान्तं ''**त:** प्रेते निष्फले **शान्ते**'' इति। विश्वशंभुप्रणीतैकाक्षरनाममालायां । पुन: कीदृशं? -**रमारमं**-रमायां-मुक्तिलक्ष्म्यां रमते य: स तं ।।१४।।

**वृत्तवैशिष्टयं :-** अत्र - पादगतप्रतिलोमयमकालङ्कार:।

एतदष्टाक्षरीयाऽनुष्टूब्जातौ **'पथ्या'** नाम विषमवृत्तम्।

तल्लक्षणं तु सिद्धहेमछन्दोऽनुशासने तृतीयेऽध्याये ३४

चतुस्त्रिंशत्तमे सूत्रे 'तद्युजो: र्ज: - **पथ्या**' इति ।

***

**श्री धर्मजिनस्तुति:**

**छन्दोनाम :-** पंचादशाक्षरीयाऽतिशक्वरीजातौ **'मालिनी'** नाम समवृत्तम्।

**वर्णन्यास :-** ।।। ।।। ऽऽऽ ।ऽऽ ।ऽऽ **(अष्ट-सप्ताक्षरैर्यति:।)**

**श्लोक: :-** **भजत भजत भव्या!, भव्यदं धर्मनाथं,**

**नमत नमत नित्यं, कर्ममर्मापहं तं ।**

**कुरुत कुरुत भक्तिं, पावनीं शर्मदात्रीं,**

**वृणुत वृणुत मुक्तिं शश्वदानन्दरात्रीम् ।।१५।।**

**अन्वय: :-** भव्या! भव्यदं, धर्मनाथं, नित्यं भजत भजत, कर्ममर्मापहं, तं, नमत नमत, पावनीं शर्मदात्रीं भक्तिं, कुरुत कुरुत, शश्वदानंदरात्रीं, मुक्तिं, वृणुत वृणुत ।

**विवरणं :-** **भजत भजत....**। हे **भव्या**! मुक्तिगमनपात्रतायुतसत्वा ! यूयम् ! भव्यं कल्याणं ददातीति भव्यद:, तं **भव्यदं** - कल्याणप्रदं । **धर्मनाथं** -

पञ्चदशमं तीर्थनाथं । **नित्यं** - दिवानिशं । 'नित्यं' पदं त्रिषु पादेषु अन्वेति। **भजत भजत** - सेवध्वम् सेवध्वम्। नमत नमत - नमस्कुरु नमस्कुरु कं? तं - धर्मनाथं । कीदृशं? - **कर्ममर्मापहं** कर्मण: मर्म - मोहनीयं कर्म, तं अपहन्ति य: स तं। **कुरुत कुरुत** - विधत्त विधत्त । कां? **भक्तिं** - सेवां । कीदृशीं? **पावनीं** - पवित्रां - पुण्यां । पुन: कीदृशीं? **शर्मदात्रीं** - शर्म - सुखं - स्वस्वभावरमणतारूपं - अपवर्ग - स्वर्गरुपं वा दात्री - दायिका या सा, तां प्रभुभक्तिरवश्यं मोक्षं वाऽभ्युदयो वा ददात्येव **वृणुत वृणुत** - उद्वहतु उद्वहतु । कां? **मुक्तिं** - शिववधूं कीदृशीं? - **शश्वदानंदरात्रीं** शश्वद् - निरन्तरं, आनन्दं - सुखं, राति- ददाति या सा, तां ।।१५।।

**वृत्तवृशिष्टयं** :- अत्र - चतुर्ष्वपि पादेषु अव्यपेताऽऽदियमकालङ्कार पञ्चादशाक्षरीयाऽतिशक्वरीजातौ **'मालिनी'** नाम समवृत्तम् तल्लक्षणं तु सिद्धहेमछन्दोऽनुशासने द्वितीयेऽध्याये २४६ तमे सूत्रे ''नौ म्-यौ यो **मालिनी**'' इति। अत्राष्टसप्ताक्षरै: विराम: ।

# आदर्शं पत्रलेखनम्

- *पं. अमृतपटेलः

पत्रलेखनप्रारम्भ एवं स्यात्,

पत्रप्रेषकस्य नाम,
स्थलं-समयश्च
यमुद्दिश्य पत्रः
प्रेषणीयः तस्य नाम

१) प्रथमं-नमस्कारः, यथा नमोऽस्तु इत्यादि...तदनन्तरं-मध्ये च पत्रस्य मुख्या वार्ता..........तत्र-

२) व्याकरणक्षति र्निवारणीया यथा विशेष्यविशेषणयोर्मध्ये जातिविभक्ति र्वचनं समानमेव स्यात्-यथा यमुद्दिश्य पत्रं, तस्य नाम्न एवं जाति-विभक्ति वचनं-श्रीमत्, श्रीयुतः...

तदन्तरं प्रेष्यपत्रं जनं प्रति आशीर्वादो। नमस्कारो वा लेखनीयः। यथा मुनेः। आचार्यस्य वा धर्मलाभः भवतु, भूयात् इत्यादिकं लेखनीयं, (वाऽत्र धर्मलाभं स्वीकरोतु। स्वीकुर्वन्तु इत्यादिकं सौष्ठवावहम्)

३) तत्र भवतु भवतां भवतो वा कुशलं, स्वास्थ्यं च समीचीनं, धर्मे सन्ततोद्यमो वा, अत्र तृतीयक्रमे पत्रप्रापकस्यैव कुशलादिकमुचितम् अथवा तस्य आराध्यस्य कृपाप्राप्तिरिच्छनीया-यथा 'आर्हतशासनस्य कृपया भवतां, तत्र क्षेमं, कुशलं, धर्माराधना वा भूयात्, तस्याराध्यस्य क्षेमादिकम् भवतु, भवतां आर्हते शासने क्षेमम्

* काव्यलक्षण-छन्दशास्त्रवेत्ता विद्वद्वरेण्यपण्डितवर्यः, अहमदाबादः।

इत्यादिकम्।

४) * पत्रप्रापकस्यार्थे यत् क्षेमादिकमुल्लिखितं स्यात्, तदेव क्षेमादिकं पत्रप्रेषकोऽपि स्वपक्षे लिखेत्-नान्यत्

यथा-भवतां तत्र क्षेमं, स्वास्थ्यं च सुचारु वर्तेत इत्याशासे, तथाऽत्रैव सर्वं क्षेमं सुचारु च वर्तते।

न यथा 'सद्गुरुसन्निधौ विनयादिगुणपरागं प्रगृह्णामि, जीवनोपवने। संयमोपवने वा...इत्यादि।

* अत्र पत्रप्रषेकः प्रथमं क्षेमं-कुशलवार्तामेवं परस्परं प्रदर्शयति, तदनन्तरं 'अन्यच्च, अपरञ्च, तथा निवेद्यते, तथाऽत्र, ज्ञेयमेतद् भवता-भवद्भिरिति उपशीर्षकमुल्लिख्य-स्वकीयं कार्यजातं प्रसङ्गादिकं वा सविशेषं दर्शयेत्।

५) * पत्र लेखने पञ्चमेऽत्र क्रमे [अ] - [आ] - [इ] - [ई] इत्यादिकनिर्देशपूर्वकं-पत्रप्रेषकः स्वं वृतं, स्वेन यद् ज्ञापनीयं - तद् यथा स्फुटं लिखेत्, न तु व्यस्तक्रमं वा - नष्टोद्देशं वा, नानुचितालङ्कारनिरुपणं वा, न रसबाधितम् वा, यथा- अ 'सद्गुरूपासना हि श्रेष्ठा' यदि वाक्यमिदं विधानात्मकं अस्ति, तर्हि- आ 'समतागुणनिस्यन्दने प्रवहाम्यहम् इति द्वैतीयीकमेतद् वाक्यं, पूर्वोक्तेन विधानवाक्येनान्वितं कथङ्कारं स्यात्, यतः प्रथमं विचार्यते- यद् 'सद्गुरूपासना...इत्यादिकं प्रथमं वाक्यं 'प्रवहामि' इति क्रियापदेन नाऽन्वितं स्यात्, तत् तु प्रथमा विभक्त्यन्तमस्ति - अतोऽत्र सम्मार्जनं 'सद्गुरूपासनां...इति द्वितीयान्तं पदम् समुचितम्,

* यदि[अ]प्रथमं - [आ]द्वितीयं वाक्यं परस्परं स्वतन्त्रम्, नाऽन्योन्य संबद्धं -तर्हि आ वाक्ये 'समतागुण - निस्यन्दे प्रवहाम्यहम् - इत्यत्र कं कर्मतापन्नम् प्रवह धातोः प्रयोगे? इत्याकाङ्क्षानिर्वर्त्तनम् न स्यात्, साकाङ्क्षं च पदं, न वाक्यार्थसम्पादनार्थमलम्।

* द्वितीयं तावदत्र विचारचर्चामञ्चति-यत् 'समतागुणनिस्यन्दने' इति परे कथमल-ङ्कारसाङ्गत्यम्?

यथा-निस्यन्दनं तु पुष्प-फलादिके भवति-यथा 'माकन्दरस निस्यन्द' इत्यादिकम्, अतोऽत्र निस्यन्दनक्रियायाः 'समतागुणस्य' केनापि पुष्पादिना सह रूपकं न योजितम्, अतो 'निस्यन्दन' पदं अधिकपदत्वदोषदूषितं भवति। अतोऽत्र एव सम्माज्र्यते -

* सद्गुरूपासनां श्रेष्ठां, समतागुणमाकन्दरस-निस्यन्दनभूतां। समतामाकन्द-निस्यन्दिन्तं। समता सहकार निस्यन्दनाऽऽस्पदां-वहामि...इत्यादिविधं

* तृतीयं चात्र 'प्रवहामि' प्रयोगे 'प्र' उपसर्गोपि, न स्वाभिमतार्थाभिव्यक्ति क्षमः, वह् धातुः वहने, प्र उपसर्गेण सह 'वहामि' अर्थो न, किन्तु प्रवाहः - भाषायां 'रेलो' यथा

जलप्रवाहः - 'नद्या जलं प्रवहति इत्यादि साधुः प्रयोगः,

[इ] यदि वा सहसैव विना पूर्वं उद्देश्य-एवं-यथा लिख्येत-

'क्षमाऽसिना क्रोधारिं नाशयामि' -

तदत्रैवं चर्च्येत-

अकाण्डे आरब्धं 'क्षमासिना क्रोधारिनाशनं प्राक्-न क्षमायाः उल्लेखः कृतोऽस्ति, न क्रोधस्यारित्वेन कथनम्, अतो न क्षमाया असित्वोल्लेखः क्षमः, अतः अकाण्डे भावोदयः,

तथा चाऽपरम् - पूर्वं तु 'समता' या भवतोल्लिखिता, ततः पश्चात् 'तस्य परपर्यायभूतस्य क्षमाशब्दस्य प्रयोगः कृतः - यदि भवतैवं रूपं विचार्योल्लेखः कृतस्तर्हि प्रक्रमः भग्नः स्यात्,

एकस्मिन्नेव सन्दर्भे कस्यापि शब्दस्य धातोरपि पर्यायस्य प्रयोगेण प्रक्रमः भग्नो भवेत्, पूर्वं च समतागुणस्य निस्यन्दशब्द प्रयोगेण लतात्वं व्यङ्ग्यं कृतं, तदनन्तरमेव विना केनापि व्यवधानेन, निरन्तरतया 'क्षमा' शब्दवाच्येन 'समार्थेन' असेरूपक्रमायोजितम्-तन्नोचितम्,

अत्र सर्वं मूलतया संशुध्यते-संयतस्य उपवनेन साकं रूपके निरूपिते, समतागुणस्य च निस्यन्दधर्मः प्रोक्तः, अतोऽत्र क्षमा अपि वृक्षस्य। लतायाः वा केनापि धर्मेण निरुपणीया अस्ति, न तद् विरूद्धेन, तदितरेण वा खड्गादिना,

नियमोऽस्ति=यद् येषु पदार्थेषु परस्परं निरुप्यमाणेषु, विषयीक्रियमाणेषु

समानधर्मेणैव रूपकाऽलङ्कारत्वमावहति-

* परस्परमनुकूलेन धर्मिणा वा

'तथा-ऽत्र' 'क्षमायाः' आलवालत्वं, जलत्वं, वृत्तित्वं वा समीचीनम् यदि चोल्लेखः स्यात्-यथा संयमाराधनायां पुनः पुनः प्रसन्नतामादधामि-इति,[ई]

तदत्रैवमौचित्यमश्चति, यद् पूर्वं तु - सद्गुरोरूपासना, समताक्षमयोश्च प्राप्ति र्व्यावर्णिता, ततश्च 'संयमाराधनायां प्रसन्नताया आधानमुक्तम्-फलस्वरूपमेतत् प्रसन्नताऽधानम्, अतो यदि संयमोपवने समतासहकारलतायाः क्षमाऽऽलवालरक्षितायाः अथवा क्षमाजलपरिष्कृतायाः प्रसन्नताफलमादधामि-इति यद्युक्तं तदा 'रूपकमैतत् अलङ्कारत्वं सुष्ठुतया संवृणुयात्

* एवं पञ्चमेऽत्र पत्रविभागे यत् किञ्चित् स्ववृत्तं, सदुपदेशादिकं वा मनीषितं-तत् सर्वं सुस्पष्टं-निर्दोषं-सरलं वर्णनीयम्

* अन्यच्च व्याकरणक्षतयः शब्दप्रयोगेषु स्वराणां ह्रस्वत्वं-दीर्घत्वं विशेष्य-विशेषणयोः जाति-विभक्ति -वचनेषु समानत्वं सदा प्रसिद्धग्रन्थप्रयुक्तशब्दा एव प्रयोक्तव्या, देश्यः लोकभाषायाः शब्दाः वर्जनीयाः-

* एतत् सर्वं गीर्वाणगिरायां लेखनक्षणे न भवेत्, तदर्थं सोपयोगेन भाव्यं,

नाऽल्पसमयेन लेखनीयम्, न च लेखने त्वरा कार्या-लिखितं च पुनः स्वस्थचेतसा पठनीयमेव-[उ]पत्रप्रान्ते च आशी र्वा नमस्कारो वा- समौचित्यैनोल्लेखनीयम्, यदि चान्ते एवं लिख्यते-

यथा 'मद्गुरुदेवधर्मलाभः स्वीकर्तव्यः'-तदत्रैवं चर्च्यते, आशीर्वादो न स्वीकार्यः, स तु देयः - तथा 'मद्' इति पदेन गुरुदेवादीनां पूज्यवाच्यपदानां समासो न कर्त्तव्यः - अतः मम गुरुदेवस्य अथवा मम धर्मलाभः अस्ति। अस्माकं वा गुरुदेवः भवन्तं धर्मलाभाऽऽशिषा समन्वितं करोति, धर्मेण लाभान्वितं करोति, धर्मं लाभाय ददाति, इत्यादिकं सौदार्यं व्यावर्ण्यम्

[ऊ] तदनन्तरं यत् किञ्चत् कार्यं भावि,-तस्य सामान्यतयोल्लेखं कृत्वा पत्रं परिसमापयेत्।-

## लेखप्रेषकेभ्यो विज्ञप्तिः

* "श्रीनिःश्रेयसम्"पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीयाऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्।

* स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छताऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते।

* नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यिकी।

* ये लेखा निर्णितप्रकाशनदिनात् चैत्रकृष्णाद्वादशीदिनाऽभ्यन्तरे (दि.१६ एप्रिल) मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते,

* तदनन्तरं प्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्।

* गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसन्धिः कर्तव्यैव।

* अर्थभेदस्थान एव "अवग्रहः" कर्तव्यः।

* अनुस्वारानुनासिकयोर्विकल्पस्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वारस्तत्रानुस्वारकरणे न बाधा।

* लेखप्रकाशनेऽप्रकाशने च सम्पादकप्रवराणामेवाधिकारो भविष्यति।

**-प्रकाशकः**

# गणतन्त्र-दिवसम्[१]

-*डॉ. आचार्यरामकिशोरमिश्रः

अद्यैव तन्मे गणतन्त्र-दिवसम्[१]।
विदधाति यन्मामविषण्णमनसम्।
येन स्वकीये मम भारतेऽस्मिन्,
प्रासारि जातेरेकत्वहाला।
अस्पृश्यतामति दूरे विहाय,
प्राक्षेपि कण्ठे सुमनैकमाला।।
तन्न स्मरेयं कथमद्य दिवसम्।
विदधाति यन्मामविषण्णमनसम्।।१।।

जनमेजय-चन्द्रगुप्तप्रवृत्ते,
गणतन्त्रदिवसद्वितयेऽत्र पूर्वम्।
कृत्वाऽऽत्मसाद् नागान् मुस्लिमाश्च,
विहितो हि जातिच्छेदः सहर्षम् ।।
के संस्मरन्ति न तं तं सुदिवसम् ।
विदधाति यन्मामवषिण्णमनसम् ।।२।।

सन्त्यस्य विधयः प्रोन्नतिकरा ये,
पुरुषेण पुरुषं सम्मेलयन्ति।

* डॉ.आचार्यरामिकिशोरमिश्रः २१५/१४ पट्टीरामपुरम्, खेकडा (बागपत) उ.प्र.२५०१०१

१. क्लीबे दिवसवासरौ'अमरकोष-१/८/२ इति वा नपुंसकत्वम्।

ये संविधानं नाऽत्राऽऽचरन्ति,
सूर्ये तपति ते दिवान्धा भवन्ति।।
तं विस्मरेत न गणतन्त्र-दिवसम्,
विदधाति यन्मामविसण्णमनसम् ।।३।।

के नाऽद्य सन्तीह प्रसन्नचित्ताः ?
केषान्न श्रद्धायुतमानसानि ?
खसरग्रहेशे १९५० वर्षे प्रवृत्तम्,
वदनाऽऽत्मके २६ जनवर्यह्नि यानि-
तं किं स्मरन्ति न गणतन्त्रदिवसम्,
विदधाति यन्मामविषण्णमनसम् ।।४।।

# वैश्विक: सखा

-*प्रो.चंदुलाल व. ठकराल:

**दिव्यं नाम**

आश्चर्यजनका खलु दिव्यनाम्न: शक्ति:। सर्वेषु कालेषु तस्य नामस्मरणं पुन: पुन: कुरुत, स्वाध्यायं च क्रीडाकार्यभाजनविश्रामसमयेषु अपि। कस्यापि देवस्य नाम-वन्दनं कुरुत, श्रीराम-ॐ नम: शिवाय-ईशुख्रिस्त-अल्लाहादीनि तस्य नामानि पुन: पुन: सदुच्चारणं कुरुत सदा सर्वदा।

सर्वासां प्रेरणानां शक्तेश्च स्रोत: प्रभोर्नाम। दृढतया तस्य सङ्गं सेवनं च कुरुत। कस्यापि व्याधेस् तु सर्वश्रेष्ठमौषधम्।

**सेवा**

दरिद्रान् ऋग्णांश्च सेवध्वम्। आवश्यकतापीडितान् सेवध्वम्। शोकातुरान् दु:खितांश्च सेवध्वम्। पक्षिण: पशूंश्च सेवध्वम्। कृपालुतया प्रेम्णा सदानुभूत्या च सेवध्वम्। सेवा नाम प्रभो: भक्ति:। अपरान् सेवमान: प्रभुमेव भजति। सर्वोच्च: खल्वेष धर्म:।

**प्रभु:**

प्रभु: प्रमा। प्रभु: सत्यम्। प्रभु: शान्ति:। प्रभु: ज्ञानम्। प्रभु: शक्ति:। प्रभु: रमानन्द:। स युष्माकं हृदये निवसति। स युष्माकं यथार्थ: सखा मार्गदर्शकश्च। यथार्थतया स युष्माकं पिता माता च। तस्य साक्षात्कारं कुरुत तथा च सर्वदा सुखिन: शान्तिपूर्णाश्च भवत।

* एम. एच. स्वामी शिवानन्दजीकृताङ्लपुस्तकगतचिन्तनकर्णिकाया: सं. अनुवाद:

## प्रार्थना

प्रार्थयत, ध्यानं कुरुत, प्रभोः नाम्नां जपं च कुरुत सर्वदा। भक्ति-प्रेमभ्यां पूरितेन हृदयेन तं प्रार्थयत। आदर्शकिशोरः किशोरी वा भवितुं तं प्रार्थयत। संपूर्णतया तं शरणं गच्छत।

## स्वर्णिमनियमाः

प्रेम्णः कल्याणस्य च सर्वान् विचारान् प्रति प्रतिध्वनिं कुरुत। अन्येषां दोषाणां क्षतीनां चान्वीक्षणं मा कुरुत। अन्येषु स्थितकल्याणकारकतत्त्वस्य प्रशंसां कुरुत। तेषां निर्बलतायाः ध्यानपूर्णकमवलोकनं मा कुरुत। यो जनो युष्माकं हानिं कर्तुमिच्छति, तस्य कृते प्रार्थनां कुरुत। अपमानं व्रणांश्च सहध्वम्। कल्याणकारकाः भवत, कल्याणं च कुरुत।

## नायकाः भवत

भीरवः मा भवत। शौर्ययुक्ताः भवत। निर्भीकाः भवत। प्रसन्नाः भवत। सिंहवत् गतिं कुरुत। निर्भयतया वदत। लज्जां न अनुभवत। सर्वदा सक्रिया एव भवत। ईश्वरे श्रद्धां विश्वासञ्च धारयत।

## मिताचाराः भवत

अल्पां क्रीडां कुरुत, अधिकमध्ययनं कुरुत। अल्पं शयनं कुरुत, अधिकां प्रार्थनां कुरुत। अल्पमुपदेशं कुरुत, अधिकमाचरणं कुरुत। अल्पं संग्रहं कुरुत, अधिकं दानं दत्त। अल्पं वद, अधिकं शृणुत। अल्पमुपविशत, अधिकां सेवां कुरुत।

## अन्येषां विचारं कुरुत

मार्गात्कण्टकान् काचशकलांश्च दूरीकुरुत। वैद्यकीयां प्राथमिकीं शिक्षां प्राप्नुत। बालवीराः मार्गदर्शिका वा भवत। मातरं पाकशालायां सहायं कुरुत। गृहं स्वच्छं कुरुत। स्वानि वस्त्राणि स्वयमेव क्षालयत। अन्धान् मूकांश्च सहायं करुत। स्वान् स्वाध्यायिनश्च सहायं कुरुत। युष्माभिर्यद् शिक्षणं प्राप्तं तद् अवगमयितुं प्रयत्नं कुरुत।

## सहनशीलाः भवत

सर्वेषां धर्माणामादरं कुरुत। सर्वे धर्माः एकमेव प्रभुं प्रति नयन्ति। सर्वेषां सतां महात्मनां च आदरं कुरुत। ते सर्वे प्रभोः सन्देशवाहकाः। सर्वेषां धर्माणां प्रमुखाः सिद्धान्ताः

समाना एव। सुचारूतया एतत् स्मृतौ धारयत।

### अविक्षोभः

सर्वासु परिस्थितिषु क्षोभरहिताः प्रशान्ताश्च भवत। पुनः पुनरस्य सद्गुणस्य गहनं परिचयं कुरुत। अविक्षोभो नाम शिलासदृशः, उत्तेजनानां तरंगः तस्योपरि आघातं करोतु नाम किन्तु न तस्मिन् प्रभावः संजायते।

### एक एवाद्वितीयः प्रभुः

प्रभुरेकः अद्वितीयः। परन्तु तस्य नामानि स्वरूपाणि चानन्तानि। केनापि नाम्ना तस्याह्वानं कुरुत, तं च केनापि युष्माकं रुचिकरेण स्वरुपेण भजत। अवश्यमेव तस्य दर्शनं भविष्यति। तस्यानुग्रहलाभश्च भविष्यति।

# जैनप्रमाणमीमांसाया मूलाधारः प्रामाण्यविमर्शश्च

- *आचार्यः गोकुलचन्द्रजैनः

जैनदार्शनिकप्रस्थाने विद्यते समृद्धा शास्त्रपरम्परा प्रमाणमीमांसायाः। नात्र सन्देहावकाशः। समन्तभद्र-सिद्धसेनदिवाकर-भट्टाकलङ्कदेव-विद्यानन्द-अनन्तवीर्य-प्रभाचन्द्र-अभयदेवसूरि-माणिक्यनन्दि-हेमचन्द्र-यशोविजयप्रभृतिभिः मनीषिभिः विनिर्मिताः शताधिकाः ग्रन्थाः प्रमाणमीमांसायाः विविधान् विषयान् सोपपत्तिकं विवेचयन्ति। एभिः ग्रन्थैः जैनदर्शने प्रमाणमीमांसायाः विकासक्रमोऽपि विज्ञायते। अस्याः प्रमाणमीमांसायाः मूलाधारः संक्षेपेणात्र प्रस्तूयते।

जैनश्रमणधारायाः प्राचीनपरम्परायां प्रमाणमीमांसायाः विवेचनं नास्ति। प्रमाण-प्रमेयादिशब्दानां प्रयोगोऽपि तत्र न विद्यते। शास्त्रकारैः ज्ञानस्य विस्तृतं विवेचनं कृतम्। ज्ञानस्य विवेचनं तत्त्वार्थनिरूपणसापेक्षं कर्मसिद्धान्तानुगतं चास्ति। सिद्धान्तग्रन्थेषु ज्ञानम्, ज्ञेयम्, प्रत्यक्षम्, परोक्षम्, सम्यग्ज्ञानम्, मिथ्याज्ञानम्, पञ्चविधं ज्ञानं, तेषां स्वरुपं भेदप्रभेदाश्च, सर्वं विस्तरेण विवेचितम्। एषा ज्ञानमीमांसा दार्शनिकयुगे प्रमाणमीमांसायाः मूलाधारः संवृत्तः। जैनमनीषिमिः ज्ञानमीमांसा युगानुरूपं प्रमाणमीमांसारूपेण व्याख्याता। सिद्धान्तपरम्परायाः संरक्षणपूर्वकं प्रमाणमीमांसासम्मतानां नव्यानां पारिभाषिकशब्दानां समावेशोऽपि विहितः। नन्दीसूत्रम् बृहत्कल्पभाष्यम्, प्रवचनसारादिग्रन्था प्राचीनप्राकृता-गमपरम्परासम्मतां ज्ञानमीमांसां निरुपयन्ति।

ज्ञानमीमांसायाः प्रमाणमीमांसारूपेण विवेचनं सर्वप्रथमं संस्कृततत्त्वार्थसूत्रे प्राप्यते। सूत्रकारेण पञ्चविधं ज्ञानं निर्दिश्य तेषां ज्ञानानां प्रमाणत्वमुक्तम्। ततः तेषां प्रत्यक्षपरोक्षत्वं निरूपितम्। तद्यथा-

* इ-१, रो हाउस शालिमारफार्म्स विपल्याहाना इन्दौर-४५२०१६ (म.प्र.)

मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम्।

तत्प्रमाणे ।

आद्ये परोक्षम् ।

प्रत्यक्षमन्यत् । – सूत्र०८-१२।

सूत्रचतुष्टयमिदं संक्षेपेण जैनप्रमाणमीमांसायाः मूलाधारं निर्दिशति मतिज्ञानम्, श्रुतज्ञानम्, अवधिज्ञानम्, मनःपर्ययज्ञानम्, केवलज्ञानं चेति पञ्चविधं ज्ञानम्, तत्र मति-ज्ञानम्, श्रुतज्ञानं च परोक्षज्ञानम्। अवधिज्ञानम्, मनःपर्यय ज्ञानम्, केवलज्ञानं च प्रत्यक्षज्ञानम्। सम्यग्ज्ञानमेव प्रमाणम्। न मिथ्याज्ञानम्। यतो हि 'मतिश्रुतावधयो विपर्ययश्च' (त.१/३२) इति ज्ञानत्रयस्य मिथ्यात्वमपि सम्भाव्यते।

## प्रत्यक्ष-परोक्षयोः निर्धारकतत्त्वम्

ज्ञानमीमांसायां ज्ञानस्य प्रत्यक्षत्वं परोक्षत्वं च भिन्नैः कारणैः निर्धार्यते। इन्द्रियसापेक्षं ज्ञानं परोक्षम्। आत्मसापेक्षं ज्ञानं प्रत्यक्षम्। परमार्थेन केवलज्ञानमेव प्रत्यक्षम्। कर्मावरणविप्रमुक्तम् आत्मनः शुद्धस्वरूपमेव केवलज्ञानम्। आत्मा ज्ञानान्न भिन्नः। ज्ञानमेव आत्मा। अत एवोच्यते-

**''णाणं अप्प त्ति मदं, वट्टदि णाणं विणा ण अप्पाणं।**
**तम्हा णाणं अप्पा, अप्पा णाणं व अण्णं वा ।।''**

– पवयणसारो गाथा २७।

अवधिमनःपर्ययज्ञानं कर्मावरणक्षयोपशमापेक्षया आत्मसापेक्षत्वात् प्रत्यक्षम्। अत एव देशप्रत्यक्षम्। न सकलप्रत्यक्षम्।

## परोक्षज्ञानम्

इन्द्रियसापेक्षं ज्ञानं परोक्षम्। इन्द्रियाणि परद्रव्यम्। परतः ज्ञानं परोक्षज्ञानम्! प्रमाणमीमांसायां प्रत्यक्षस्य परोक्षस्य च स्वरूपं ज्ञानमीमांसायाः भिन्नम्। इन्द्रियज्ञानस्य प्रत्यक्षत्वं तत्र स्वीक्रियते। न ज्ञानमीमांसायाम्। अनेनैव कारणेन जैनप्रमाणमीमांसायां प्रमाणलक्षणं दर्शनान्तरेभ्यः भिद्यते। इन्द्रियवृत्तिः, ज्ञातृव्यापारः, सन्निकर्षः जैनसम्मत प्रमाणलक्षणे न स्वीकृतम्।

परोक्षज्ञानस्य भेदाः मतिज्ञानस्य नामान्तरेषु परिगणिताः। तत्त्वार्थसूत्रकारेण ''मतिः स्मृतिः संज्ञा चिन्ता-अभिनिवोध इत्यनर्थान्तरम्'' तथा ''तदिन्द्रियाऽनिन्द्रियनिमित्तम्''

(सूत्र०१३,१४) इत्युकृत्वा परोक्षज्ञानकारणं भेदाश्च निर्दिष्टाः। अनिन्द्रियं मनः। इन्द्रिय-मनसः जायमानं ज्ञानं परोक्षम्। एवं मतिज्ञानं श्रुतज्ञानं च परोक्षज्ञानम्, श्रुतज्ञानस्य मतिज्ञानपूर्वकत्वात्।

स्मृतिः संज्ञा चिन्तादयः ज्ञानस्य प्रकाराः प्रमाणमीमांसायां स्मृतिप्रमाणम्, प्रत्यभिज्ञानप्रमाणम्, तर्कप्रमाणम्, इति नाम्ना परोक्षप्रमाणे विवेचितम्। एवं ज्ञानमीमांसा निम्नाङ्कितरुपेण ज्ञातुं शक्यते-

- **ज्ञानम्**
  - प्रत्यक्षज्ञानम्
    - अवधिज्ञानम्
    - मनःपर्ययज्ञानम्
    - केवलज्ञानम्
  - परोक्षज्ञानम्
    - मतिज्ञानम्
      - मतिः
      - स्मृतिः
      - संज्ञा
      - चिन्ता
      - अभिनिबोधः
    - श्रुतज्ञानम्
      - स्याद्वादः
      - नयः

एतेषां ज्ञानानां स्वरूपम्, उत्पत्तिक्रमः, ज्ञानानां कारणानि, ज्ञानस्य प्रयोजनं तथान्ये सम्बद्धविषयाः ज्ञानमीमांसायां विस्तरेण विवेचिताः सन्ति। एषा ज्ञानमीमांसा दार्शनिकयुगे जैन प्रमाणमीमांसायाः मूलाधारः संजातः, पूर्वोक्तमिति।

**ज्ञानस्य प्रमाणत्वम्**

जैनप्रमाणमीमांसायां दार्शनिकैः प्राचीनपरम्परायाः संरक्षणपूर्वकं ज्ञानमीमांसा प्रमाणमीमांसारूपेण व्याख्याता। सम्यग्ज्ञानस्य प्रमाणत्वं प्रतिपादयद्भिः तैः प्रमाणलक्षणं तथा निर्धारितं येन सिद्धान्तस्य पूर्णतया संरक्षणं भवेत्। आप्तमीमांसायां समन्तभद्रेण निगदितम्-

**''तत्त्वज्ञानं प्रमाणं ते, युगपत्-सर्वभासनम् ।**

**क्रमभावि च यज्ज्ञानं, स्याद्वादनयसंस्कृतम् ।।''**

प्रमाणमीमांसायाः मुख्यरूपेण चत्वारः विचारणीयाः विषया। तद्यथा-

१. प्रमाणस्य लक्षणम् ।

२. प्रमाणस्य भेदाः ।

३. प्रमाणस्य विषयः ।

४. प्रमाणस्य फलम् ।

एतेषां विषयाणां विवेचने प्रस्थानभेदेन वैविध्यं वर्तते। पूर्वोक्तकारिका प्रथमत्रयो विषयाः विवेचिताः। तद्यथा–

१. तत्त्वज्ञानं प्रमाणम्। इति प्रमाणलक्षणम्।

२. तद् द्विविधम्– १. अक्रमभावी २. क्रमभावी च।
अक्रमभाविज्ञानम् केवलज्ञानम्। तदेव तत्त्वज्ञानम्।
क्रमभाविज्ञानम् स्याद्वादरूपम्, नयरूपम् च।

३. प्रमाणस्य विषयः सर्वज्ञेयपदार्थाः ।

अतः परं पूर्वोक्तज्ञानानां फलं निम्नाङ्कितरूपेण दर्शितम्–

**"उपेक्षाफलमाद्यस्य शेषस्यादानहानधीः।**
**पूर्वं वाऽज्ञाननाशो वा, सर्वस्यास्य स्वगोचरे।।"**

अयं भावः – केवलज्ञानस्य फलम् 'उपेक्षा'। जाते *केवलज्ञाने वीतरागभावो जायते। अन्येषां ज्ञानानां फलं हेयोपादेयबुद्धिः। उपेक्षाऽपि एषां ज्ञानानां फलं संभवति। अज्ञाननाशः सर्वेषां ज्ञानानां फलम्।

**ज्ञानमीमांसायाः प्रमाणमीमांसारूपेण व्याख्या**

भट्टाकलङ्कदेवेन ततश्च विद्यानन्देन पूर्वोक्ताः विषयाः 'आप्तमीमांसाभाष्ये' 'अष्टसहस्री' इत्यपरनाम्ना प्रसिद्धे ग्रन्थे 'आप्तमीमांसालङ्कृतौ' विस्तरेण विवेचिताः जैनदार्शनिकैः ज्ञानमीमांसा मूलाधाररूपेण स्वीकृता प्रमाणमीमांसारूपेण च व्याख्याता। तदत्र निम्नाङ्कितरूपेण ज्ञातुं शक्यते–

- **प्रमाणम्**
  - प्रत्यक्षम्
    - देशप्रत्यक्षम्
    - सकलप्रत्यक्षम्
  - परोक्षम्
    - स्मृतिः
      - सांव्यवहारिकम् मतिज्ञानम्–इन्द्रियप्रत्यक्षं वा)
        - अवग्रहः
        - ईहा
        - अवायः
        - धारणा
    - प्रत्यभिज्ञानम्
    - तर्कः
    - अनुमानम्
    - आगमः

एवं ज्ञानंमीमांसा प्रमाणमीमांसायाः मूलाधारः, इति जैन परम्पराभिमतशास्त्राणां

* जैनसिद्धान्ते श्वेताम्बरमते पूर्वं वीतरागभावो जायते पश्चाद् केवलज्ञानं इति वाचकैरवधार्यम्।

परिशीलनेन सुनिश्चितं भवति। प्रमाणस्य लक्षणम्, प्रमाणस्य भेदाः, प्रमाणस्य विषयः तथा प्रमाणस्य फलम् जैनदार्शनिकैः ज्ञानमीमांसानुरूपं विवेचितम्। एतत् सर्वं दार्शनिकग्रन्थेषु सुस्पष्टं परिलक्ष्यते। दर्शनान्तरसम्मतानां सिद्धान्तानां समीक्षा ज्ञानमीमांसानुरूपा। अत एव प्रस्थानभेदः। आत्मनः शुद्धस्वरूपं तत्त्वार्थनिर्णयेनैव ज्ञातं भवति। आत्मा ज्ञानान्न भिन्नः। परमार्थेन आत्मा आत्मना आत्मानं वेत्ति। व्यवहारेण तु सर्वं जानाति। ज्ञानस्य स्वपरप्रकाशकत्वात्। अत एवोच्यते–

**''जाणदि पस्सदि सव्वं ववहारणयेण केवली भगवं।**

**केवलणाणी जाणदि पस्सदि णियमेण अप्पाणं।।''**

णियमसार; १५८ अनेकान्तस्वरूपं वस्तुतत्त्वं केवलज्ञानेन प्रत्यक्षं ज्ञायते। स्याद्वादेन नयेन च एकांशेन ज्ञायते। इदं ज्ञानस्य माहात्म्यम्। इति शम्।

**सन्दर्भग्रन्थाः**


नंदिसुत्तं – श्री महावीर जैन विद्यालय, बम्बई।

पवयणसारो – परमश्रुतप्रभावकमंडल, आगास।

णियमसारो – कुन्दकुन्दभारती, नई दिल्ली।

बृहत्कल्पसूत्रम् – श्री जैनआत्मानन्दसभा, भावनगर।

तत्त्वार्थसूत्र – पा.वि. शोधसंस्थान, वाराणसी।

आप्तमीमांसा – वीरसेवामन्दिर, दिल्ली।

आप्तमीमांसाभाष्यम् – सनातनजैनग्रन्थमाला, वाराणसी।

अष्टसहस्री – निर्णयसागर प्रेस, बम्बई।

लघीयस्त्रयम् – सिंधीजैनज्ञानपीठ, कलकत्ता।

प्रमेयकमलमार्तण्ड – निर्णयसागर प्रेस, बम्बई।

जैनदर्शन – गणेशप्रसाद वर्णी ग्रन्थमाला, वाराणसी।

जैनन्याय – भारतीय ज्ञानपीठ, वाराणसी।




संसारार्तिविभेदनैकप्रवणं,
निःश्रेयसं गीयते,
सम्यग्ज्ञानसुरापगा वितनुतां,
निःश्रेयसं भास्वरम्।
बुद्धिवैभववारिधिर्विलसति,
निःश्रेयसेनाद्भुतो,
वर्णन्याससुरम्यकाव्यरचना,
निःश्रेयसायाऽस्तु मे ।।१।।

वाक्शुद्धिं प्रतिभां नवां च लभते,
निःश्रेयसाद् वाचकश्,
चत्वारो गुणखण्डका गुणकरा,
निःश्रेयसस्याङ्गणे.
कीर्ति र्मुक्तिकरी च सद्गुणकरी,
निःश्रेयसे संभवेत्,
सद्भावैः समतादिकैः शुभकृते,
निःश्रेयस! स्यात् सदा ।।२।।

**प्रकाशकम्**
**जगद्गुरु पू.आ.श्री**
**विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**
पालडी-अहमदाबाद

Matiksha
M.: 9820715236